M-38

S.K.M-104/89 (e)

श्रीमद् भागवते "पन्चम स्कंध"

समय — १७१३ शा०

पत्र — 82

भाषा — संस्कृत

॥श्रीगणेशाय नमः॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय॥ भक्तजनमानसनिवासाय श्रीरामचंद्राय॥१॥ अथातः पंचमस्कंधव्याख्यानेकविशेषवान्॥ प्रियव्रतान्वयो यत्र सप्रपंचः प्रपंच्यते॥२॥ षड्विंशत्याधुनाध्यायैः पंचमे स्थानमीर्यते॥ लोकद्वीपादिमर्यादापालनाख्यमनेकधाः॥३॥ भुविद्वीपादिमर्यादाः पाल्यंते राजभिः पृथक्॥ भूमेरुपरिदेवाद्यैस्तत श्चाधोसुरादिभिः॥४॥ तत्राध्यायैस्तु विंशत्या प्रियव्रतपुनः सुरैः॥ भुवो द्वीपादिमर्यादाः पालिता इति वर्ण्यते॥५॥ त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिष्विति कीर्त्यते॥ अतलादिषु दैत्याद्यैः पालनं च ततस्त्रिभि॥६॥ तत्र तु प्रथमेऽध्याये ज्ञानिनो राज्यनिर्वृत्तिः॥ पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाद्भुता॥७॥ वंदे प्रियव्रतस्यापि निर्बाधं नृपसत्तम॥ यो नरादात्मविद्यामधिगम्य पुनर्गृही॥८॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वर्यं समगात्पदमिति॥ पूर्वस्कंधांते प्रियव्रतस्य प्रपंचेऽप्यात्मविद्या ततो गृहाश्रमः॥ ततः संगत्यागेन मोक्ष इत्युक्तं तत्र विस्मितः पृच्छति॥ प्रियव्रतो भागवतः आत्मारामः कथं गृहेऽरमत् ननु रमतो को दोष इति चेदत आह॥

श्रीभा० पं०

१

॥ ॥ राजोवाच ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने ॥ गृहे रमत यन्मूलः कर्म
बंधः पराभवः ॥१॥ न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ ॥ गृहेष्वभिनिवेशोयं पुंसो
भवितुमर्हति ॥२॥ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानां न
कुटुंबे स्पृहामतिः ॥३॥ संशयोयं महान् ब्रह्मन् दारागारसुतादिषु ॥ सक्तस्य यत्
सिद्धिरभूत् कृष्णे च मतिरच्युता ॥४॥ श्रीशुक उवाच ॥ वाढमुक्तं भगवत उत्तमश्लो
कस्य श्रीमच्चरणारविंदमकरंदरस आवेशितचेतसो भागवतपरमहंसदयित
कथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ॥५॥ यर्हि वा
व ह राजन् स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसाव
गतपरमार्थसतत्वो ब्रह्मसत्रेण दीष्यमाणोऽवनितलपरिपालनायाम्नातप्र
वरगुणगणैकांतभाजनतया स्वपित्रोपमंत्रितो भगवति वासुदेव एवाऽव्यवधा
नसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनंदद्यद्यपि

राम०

१

कःकोल्लकः सह्योदेवगिरिऋष्यमूकः श्रीशैलोवेंकटःमहेंद्रोवारिधा
रोविंध्यःशुक्तिमान्ऋक्षगिरिःपारियात्रोद्रोणश्चित्रकूटोगोवर्द्धनो
रैवतकःककुभोनीलोगोकामुषइंद्रकीलःकामगिरिरितिचान्येच
शतसहस्रशः शैलास्तेषांनितंबप्रभावानदानद्यश्चसंत्यसंख्याताः॥१६॥
एतासामपोभारत्यःप्रजानामभिरेवपुनंतीनामात्मनाचोपस्पृशंति
॥१७॥चंद्रवसाताम्रपर्णीअवटोदाकृतमालावैहायसीकावेरीवेणीप
यस्विनीशर्करावर्तातुंगभद्राकृष्णावेण्याभीमरथीगोदावरीनिर्विंध्या
पयोष्णीतापीरेवासुरसानर्मदाचर्मण्वतीसिंधुःअंधःशोणश्चनदौ
महानदीवेदस्मृतीऋषिकुल्यात्रिसामाकौशिकीमंदाकिनीयमुनासर
स्वतीदृषद्वतीगोमतीसरयूरोधस्वतीसप्तवतीसुषोमाशतद्रूश्चंद्रभागाम

श्रीभा०पं०
५५
28 leaves

द्धावितस्ताअसिक्नीविश्वोद्रेतिमहानद्यः॥१८॥अस्मिन्नेववर्षेपुरुषैर्लब्ध
जन्मभिःशुक्ललोहितकृष्णवर्णेनस्वारब्धेनकर्म्मणादिव्यमानुषनारकगत
योबह्व्यआत्मनआनुपूर्व्येणसर्वाह्येवसर्वेषांविधीयंतेयथावर्ण
विधानमपवर्गश्चापिभवति॥१९॥योसौभगवतिसर्वभूतात्मन्यनात्म्येनि
रुक्तेऽनिलयनेपरमात्मनिवासुदेवेनन्यनिमित्तभक्तियोगलक्षणोनाना
गतिनिमित्ताऽविद्याग्रंथिरंधनद्वारेणयदाहिमहापुरुषप्रसंगः॥२०॥
एतदेवहिदेवागायंतिअहोअमीषांकिमकारिशोभनंप्रसन्नएषांस्वि
दुतस्वयंहरिःयैर्जन्मलब्धंनृषुभारताजिरेमुकुंदसेवापरिकंस्पृहाहिनः॥
२१॥किंदुष्करैर्नःक्रतुभिस्तपोव्रतैर्दानादिभिर्वाद्युजयेनफल्गुना॥नयत्र
नारायणपादपंकजस्मृतिःप्रमुष्टाऽतिशयेंद्रियोत्सवात्॥२२॥कल्पायुषां

हरे०
५५

पीतितो दूरं तायां तना ल्यश्नुते ॥२२॥ येत्विह वै पुरुषाः पुरुषमेधेन यजंते याश्च
स्त्रियो नृपशून्खादंति तांश्च ते पशव इह निहता यमसदने यातयंतो
रक्षोगणाः सौनिका इव स्वधितिनावदायासृक्पिबंति नृत्यंति गा
यंति च हृष्यमाणा यथेह पुरुषादाः ॥२३॥ येत्विह वा अनागसोरण्ये
ग्रामे वा वैश्रंभकैः रूपसृतानुपसंभय्या जिजीविषून्शूलसूत्रादिषू
पंपप्रोतान्क्रीडनकतया यातयंति तेपि च प्रेत्य यमयातनासु शूलादिषु प्रो
तात्मानः क्षुत्तृड्भ्यां चाभिहिताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्य
माना आत्मशमलं स्मरंति ॥२४॥ येत्विह वै भूतान्युद्वेजयंति नरा उल्ब
णस्वभावा यथा दंदशूकास्तेपि प्रेत्य नरके दंदशूकाख्ये निपतंति ॥ य

त्रन पदंदशूकाः पंचमुखाः सप्तमुखा उपसृत्य ग्रसंति यथा बिलशया या
न् ॥२५॥ येत्विह वा अंधावट कुसूल गुहादिषु भूतानि निरुंधंति ॥
तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुंधंति ॥२६॥
यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिध
क्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी
वज्रतुंडा गृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाटयंति ॥२७॥
यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोभिविशं
की अर्थव्ययनाशचिंतया परिशुष्यमाणहृदयो वदनो निर्वृतिमनव
गतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंर

श्रीभा० पं०
८०

वोऽनृतंवदतिसाक्ष्येविनिमयेदानेवाकथंचित्सवैप्रेत्यनरकेऽवीचिम
त्यधःशिरानिरवकाशेयोजनशतोच्छ्रायात्गिरिमूर्द्ध्नःसंपात्यतेयत्र
जलमिवस्थलमश्मपृष्ठमवभासतेतदवीचिमत्तिलशोविशीर्यमा
णशरीरोनम्रियमाणःपुनरारोपितोपतति ॥३०॥ यस्त्विहवै
विप्रोराजन्योवैश्योवासोमपीथस्तत्कलत्रंवासुरांव्रतस्थोपिवापिब
तिप्रमादतस्तेषांनिरयंनीतानामुरसिपदाऽऽक्रम्यास्येवह्निनाद्र
वमाणंकार्ष्णायसंनिषिंचंति ॥३१॥ अथचयस्त्विहवाआत्मसं
भावनेनस्वयमधमोजन्मतपोविद्याचारवर्णाश्रमवतोवरीय
सोनबहुमन्येतसमृतकएवमृत्वाक्षारकर्दमेनिरयेवाक्शिरानि

ह० स्कं०
८०

पूर्णार्णवे निपतंति तदेवातिवीभत्सितमश्नंति ॥१५॥ ये त्विह वै स्वगर्भप
तयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि सं
परेतां लक्ष्यभूतान्यमपुरुषा इषुभिर्विध्यंति ॥१६॥ ये त्विह वै दांभि
का दंभयज्ञेषु पशून्विशसंति तानमुष्मिंलोके वैशसे नरके पतितान्नि
रयपतयो यातयित्वा विशसंति ॥१७॥ यस्त्विह वै सवर्णां भार्यामपहा
यद्विजो रेतः पाययति काममोहितस्तं पापकृतममूत्र रेतःकुल्यायां पा
तयित्वा रेतः संपाययंति ॥१८॥ यस्त्विह वै दस्यवोऽग्निदा गरदा ग्रामा
न्सार्थान्वा विलुंपंति राजानो भटा वा तांश्चापि परेत्य यमदूता व
ज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति ॥१९॥ यस्त्विह

संपरस्व हृमिभोजनेनरकाधमेनिपतति तत्रशतसहस्त्रयोजनेक्रिमिकुंडेक्रिमिभि स्तिः स्वयंक्रिमिभिरेवभक्ष्यमाणः क्रिमिभोजनोरकाधमेयावत्तर प्रमत्ताप्रहुतादोनिर्वेशमात्मनंयातयत्॥१०॥यस्त्विहवैस्तेयेनबलाद्वाहिरण्यरत्नादीनिब्राह्मणस्यवापहरतित्वन्यस्यवानापदिपुरुषस्तममुत्रराजन्यरमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्वचिनिःकुर्षंति॥११॥यस्त्विहवा अगम्यांस्त्रियमगम्यंवापुरुषंयोषिदभिगच्छति तावमुत्र कशयाताडयंतस्तिग्मयासूर्म्यालोहमय्यापुरुषमालिंगयंतिस्त्रियंचपुरुषमयासूर्म्या॥१२॥

श्रीभा०पं०
७९

यस्त्विह वै सर्वाभिगमयंस्तममुत्र कशया ताडयंतस्तिग्मया सूर्म्या लोहमय्या
पुरुषमालिंग निरये वर्त्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति ॥
२३॥ यस्त्विह वै राजन्या राजपुरुषा वा अपाखंडा नू धर्मसेतून्भिं
दंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादास्तस्यां निरयपरि
खाभूतयां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वि
युज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंत उ
पतप्यंते विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहि
न्यामुपतप्यंते ॥२४॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमा
स्त्यक्तलज्जाः पशुचर्यां चरंति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममला

राम०
७९

श्रुतयोजनपरिमंडले ताम्रमये तप्ततैले उपर्यधस्तादग्न्यर्काभ्यामतित
प्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानांतर्वहिः शरीर आस्ते शे
ते चेष्टते अवतिष्ठति परिधावति च यावंति पशुरोमाणि तावद्वर्षसह
स्राणि ॥६॥ यस्त्विह वै निजवेदपथादनापद्यपगतः पार्षंडं चोपगत
स्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति तत्र हासावितस्ततो धा
वमान उभयतोधारैस्तालवनाऽसिपत्रैः छिद्यमानसर्वांगो हाहतो
स्मीति परमया वेदनया मूर्छितः पदे पदे निपतति स्वधर्महा पा
खंडानुगतं फलं भुंक्ते ॥७॥ यस्त्विह वै राजा राजपुरुषो वा अदंडे
दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्नरकेऽमुत्र सूकरमुखे

श्रीभा॰पं॰
७८

निपतति तत्रापि वलैर्विनेष्ठ्येष्यमाणावयववोयथैवेहेक्षुखंडग्रा(?)तिस्वरे
णस्वजनयन् क्वचिन्मूर्छितःकश्मलमुपगतःयथैः वेहादृष्टदोषा
उपरुद्धा॥१८॥ यस्त्विह वैभूतानामीश्वरकल्पित वृत्तीनामविविक्तप
रव्यथानांस्वयंपुरुषायकल्पितवृत्तिर्विविक्तपरमथोव्यथामाचरति
सपरत्रांधकूपेतदभिद्रोहेणनिपतति तत्राहासौतैर्जंतुभिःपशु
मृगपक्षिमृगमशकसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्येकेचा
भिद्रुग्धास्तैःसर्वतोदुह्यमानस्तमसिविहितनिद्रानिर्वृतिरलब्धा
वस्थानःपरिक्रामतियथाकुशरीरेजीव॥१९॥यस्त्विहवाअसंवि
भज्याश्नातियत्किंचनोपनतमनिर्मितंपंचयज्ञोवायससंस्तुतः

हरे॰
७८

लाभस्ततः सारमेयादनं अवीचिरय पानमिति किंच क्षारकर्द्दमो रक्षोगण
भोजनः शूलप्रोतो दंदशूकः अवटनिरोधनः पर्यावर्त्तनः सूचीमुखमि
त्यष्टाविंशतिनरका विविधयातनाभूमयः ॥७॥ तत्र यस्तु परवित्तापत्य
कलत्राण्यपहरति सहि कालपाशंबद्धो यमपुरुषैरतिभयानकैस्ता
मिस्रेनरके बलान्निपात्यते अनशनानिःपानदंडताडनसंतर्जना
दिभिर्यातनादिभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैवमूर्छा
मुपयातितामिस्रप्राये ॥८॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषंदा
रादीनुपभुंक्ते यत्रशरीरं निपातमानो यातनास्थो वेदनया नष्टमतिर्न
ष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमाणमूलस्तस्मादंधतामिस्रं

तमुपद्रिवशंति॥२॥यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण के
वलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभे
न रौरवे निपतति॥३॥ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमया
तनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसंति तस्माद्रौरवमित्या
हुः रुरुरिति सर्पादतिक्रूरसत्वापदेशः॥३॥एवमेव महारौरवो यत्र
निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयंति यः केवलं दे
हंभरः॥४ यस्त्विह वा उग्रः पशून्पक्षिणो वा प्राणत उपरंधयति त
मपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचरा कुंभीपाके तप्ततैलउप
रंधयंति॥५॥यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञिके नरके अ

पुराणे पंचमस्कंधे विविरन्यधुभवनं पंच त्रिंशोध्यायः॥२५॥ षड्विंशे
तु ततो धस्तान्नरका स्थिता उच्यते पापिनो यत्र दह्यंते यमदूतैर्यथायथं॥
॥१॥ ॥राजोवाच॥महर्षे एतद्वैचित्र्यं लोकस्य कथमिति॥ ऋषिरुवाच॥
त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य ता
रतम्येन भवंति॥१॥ अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्
तुः श्रद्धया वैसादृश्यात् कर्मफलं विसदृशं भवति या ह्यनाद्यविद्याकृ
त कामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्ये
णानुवर्णयिष्याम॥२॥ राजोवाच॥ नरका नाम भगवन् किं देशविशे
षा अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति॥३॥ ऋषिरुवाच॥ अं

तराल एव [illegible] त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जला
द्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना
सत्या [illegible] एवाशिष आशासाना [illegible] निवसंति ॥४॥ यत्र ह वाव भगवा
न् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथा
कर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति ॥५॥
तत्र हैके नरकानेकविंशतिं गणयंति अथ तांस्ते राजन् नामरूपल
क्षणतोऽनुक्रमिष्यामः तामिस्रोंधतामिस्रो रौरवो महारौरव कुंभी
पाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंश
स्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं ला

दिष्कृतसुभयसुंदरभुजोभगवान्माहेंद्रोवारणेंद्रइवकांचनीकक्षामु
दारलीलोविभर्ति॥७॥यएषएवमनुश्रुतोध्यायमानोमुमुक्षूणामना
दिकालकर्मवासनाग्रथितमविद्यामयंहृदयग्रंथिंसत्वरजस्तमोमयमं
तर्हृदयंगतआशुनिर्भिनत्ति तस्यानुभावान्भगवान्स्वयंभुवोनारद
सहतुंबुरुणासभायांब्रह्मणःसंश्लोकयामास॥८॥उत्पत्तिस्थितिलय
हेतवोऽस्यकल्पाःसत्वाद्याःप्रकृतिगुणायदीक्षयासन् यद्रूपंध्रुव
मकृतंयदेकमात्मन्नानाधात्कथमुहवेदतस्यवर्त्म॥९॥मूर्तिंनःपु
रुकृपयाबिभ्रदेवंपाठेबभारसत्वंसंशुद्धंसदसदिदंविभातियत्रयल्लीलां
मृगपतिराददेनवद्यामादातुंस्वजनमनांस्युदारवीर्यः॥१०॥यन्नामश्रुत

मनुकीर्त्तयेदकस्मादार्त्तोवायदिपतितःप्रलंभनाद्वाहंत्यंहःसपदिनृणामशेष
मन्यंकंशेषाद्भगवतआश्रयेन्मुमुक्षुः॥११॥मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नोभू
गोलंसगिरिसरित्समुद्रसत्त्वं आनंत्यादनिमितविक्रमस्यभूम्नःकोवी
र्याण्यधिगणयेत्सहस्रजिह्वः॥१२॥एवंप्रभावोभगवाननंतोदुरंतवी
र्योरुगुणानुभावःमूलेरसायाःस्थितःआत्मतंत्रोयोलीलयाक्ष्मांस्थि
तयेविभर्ति॥१३॥एताह्येवेहनृभिरुपगंतव्यागतयोयथाकर्मविनि
र्म्मिताःयथोपदेशमनुवर्णिताःकामान्कामयमानैः॥१४॥एतावतीर्हिरा
जन्पुंसःप्रवृत्तिलक्षणस्यधर्मस्यविपाकगतयउच्चावचाविसदृशायथा
प्रश्नंव्याचख्येकिमन्यत्कथयामइति॥१५॥इतिश्रीमद्भागवतेमहा

न सहस्रांतर आस्ते या वै कला भगवतस्तामसी समाख्यातानंत इति सात्वतीया
दृष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षणमित्याचक्षते ॥१॥ य
स्येदं क्षितिमंडलं भगवतोऽनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि
ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥२॥ यस्य ह वा इदं कालेनोपसंजिहीर्ष
तोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण संकर्षणो नाम रुद्र एकाद
शव्यूहः त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ॥३॥ यस्यांघ्रिकमलयुगला
रुणविशदनखमणिषंडमंडलेष्वहिपतयः सह सात्वतर्षभैः एकां
तभक्तियोगेनावनमंतः स्ववदनानि परिस्फुरत्कुंडलमंडितगंडस्थलान्य
तिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ॥४॥ यस्यैव हि नागराज

कुमार्य आशिष आशासाना अंगवलयविलसितविशदविपुलधवलसु
भगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिं
पमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मि
तास्तदनुरागमदमुदितमदविघूर्णितारुणावलोकनयनवदनारविं
दं सव्रीडं किल विलोकयंति ॥५॥ स एव भगवाननंतोऽनंतगुणार्णव आदिदे
व उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥६॥ ध्यायमानः सुरासुरोर
गसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविहृतविह्वललो
चनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपप
तीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रात
मधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककु

ति॥३०॥ततोधस्तात्पातालेनागलोकपतयोवासुकिप्रमुखाःशंखः
कुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंवलाश्वतर
देवदत्तादयोमहाभोगिनोमहामर्षानिवसंतियेषामुहवैपंचस
प्तदशशतसहस्रशीर्षाणांफणासुविरचितामहामणयोरोवि
ष्णवःपातालविवरतिमिरनिकरंस्वरोचिषाविधुन्वंति॥३१॥इ
तिश्रीमद्भागवतेमहापुराणेपंचमस्कंधेचतुर्विंशोध्यायः॥२४॥
पंचविंशेततोऽधस्तादाहशेषस्यसंस्थितिंसंजिहीर्षोरिदंकालेय
गरुडसमुद्भव॥१॥ ॥श्रीशुकउवाच॥तस्यमूलदेशेत्रिंसद्यो

दर्शनीयोमहीयते॥२८॥ततोधस्तान्महातलेकाद्रवेयाणांसर्प्पा
णांनैकशिरसांक्रोधवशोनामगणःकुहकतक्षककालियसु
षेणादिप्रधानामहाभोगवंतःपतत्रिराजाधिपतेःपुरुषवा
हादनवरतमुद्विजमानाःस्वकलत्रापत्यसुहृत्कुटुंबसंगेन
क्वचित्प्रमत्ताविहरंति॥२९॥ततोधस्ताद्रसातलेदैतेयादान
वाःपणयोनामनिवातकवचाःकालेयाहिरण्यपुरवासिनइ
तिविबुधप्रत्यनीकाउत्पत्त्यामहौजसोमहासाहसिनोभगव
तःसकललोकानुभावस्यहरेरेवतेजसाप्रतिहतबलाऽवलेशा
याइववसंतियेवैसरमयेंद्रदूत्यावाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यां

भगवतःपरामितिभगवतोपरतेखलुस्वपितरि ॥२५॥ तस्यमहानु
भावस्यानुभावस्या पथममृतजितकषायःकोवास्मद्विधःपरिही
नभगवदनुग्रहउपजिगमिषतीति ॥२६॥ तस्यानुचरितमुत्तर
स्माद्विस्तारिष्यते यस्यभगवान्स्वयमखिलजगद्गुरुर्नारायं
णोद्वारिगदापाणिरवतिष्ठतेनिजजनानुकंपितहृदयो
येनांगुष्ठेनपदादशकंधरोयोजनायुतंदिग्विजयउच्चाटितः
॥२७॥ ततोधस्तात्तलातलेमयोनामदानवेंद्रस्त्रिपुराधिपतिभगव
तोस्त्रिपुरारिणात्रिलोकीसंचिकीर्षुणानिर्दग्धस्वपुरत्रयस्तत्प्रसा
दाल्लब्धपदोमायाविनामाचार्योमहादेवेनपरिरक्षितोविगतसु

णंमायामयभोगैश्वर्यमेवातनुतेति ॥२२॥ यतद्भगवतानधिगतान्यो
पायेनयांचाछलेनापहृतस्वसरीरावशेषितलोकत्रयोवरुणपा
शैश्चसंप्रतिमुक्तोगिरिदर्यांचापविद्धइतिहोवाच ॥२३॥ नूनंब
तायंभगवानर्थेषुननिष्णातोयोसाविंद्रोयस्यसचिवोमंत्रायवृ
तएकांततोबृहस्पतिस्तमतिहायस्वयमुपेंद्रेणात्मानमयाचत
श्चात्मनश्चाशिषोनोएवतद्दास्यमतिगंभीरवयसःकालस्यम
न्वंतरपरिवृत्तंहितंकियल्लोकत्रयमिदं ॥२४॥ यस्यानुदास्यमेवा
स्मत्पितामहःकिलवव्रेनतुस्वपित्र्यंयदुताकुतोभयंपदंदीयमानं

केश्वरस्वपार्षदभूतगणावृतःप्रजापतिसर्गोपबृंहणायभवान्यास
हमिथुनीभूतआस्तेयतःप्रवृत्तासरित्प्रवराहाटकीनामभवयोर्वीर्ये
णयत्रचित्रभानुर्मातरिश्वनासमिध्यमानओजसापिबतित
न्निष्ठ्यूतंहाटकाख्यंसुवर्णंभूषणेनासुरेंद्रावरोधेषुपुरुषाः
सहपुरुषीभिर्धारयंति॥१७॥ततोधस्तात्सुतलउदारश्रवाःपु
ण्यश्लोकोविरोचनात्मजोबलिर्भगवतामहेंद्रस्यप्रियंचि
कीर्षमाणेनादितेर्लब्धकायोभूत्वावटुवामनरूपेणपरा
क्षिप्तलोकत्रयोभगवदनुकंपयैवपुनःप्रवेशितइंद्रादिष्व
विद्यमानयासुसमृद्धयाश्रियाभिजुष्टःस्वधर्मेणाराधयंस्त

मेवभगवंतमाराधनीयमपगतसाध्वसाऽऽस्तेऽधुनापि ॥१८॥ नो
एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकाया
नां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने
परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षा
दपवर्गद्वारस्य यद्बिलनिलयैश्वर्यं ॥१९॥ यस्य ह वा क्षुतपतनप्र
स्खलनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबंधनमं
जसा विधुनोति यस्य हैव प्रतिधनं मुमुक्षवोऽन्यथैवोपलभंते ॥
२०॥ तद्भगवतात्मवतां सर्वेषामात्मन्यात्मद आत्मनमेव ॥२१॥
न वै भगवान्नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोष

गंधीभिः समिषु नवविविधविहंगमजलाशयानाममलजलपूर्णा
नांउषकुलोद्धंघनक्षुभितनीरजकुमुदकुवलयकह्लारनीलोत्प
ललोहितशातपत्रादिवनेषुतन्निकेतनानामेकविहाराकुलम
धुरविविधस्वनादिभिरिंद्रियोत्सवैरमरकल्पियमेतिशायिता
नि॥ यत्र ह वा व न भयमहोरात्रादिभिःकालविभागेरूपलक्ष्य
ते॥ यत्र महाहिप्रवरशिरोमणयः सर्वं तमः प्रवाधंते॥१२॥न
वाएनेषुवसतांदिव्योषधिरसरसायनान्नपानस्नानादिराधयो
व्याधयोवलीपलितजरादयश्च देहवैवर्ण्यदौर्गंधस्वेदक्लमम्लानि
रितिवयोवस्थाश्चभवंत्यपरेशात्॥१३॥नहितेषांकल्याणानांप्रभवति

कुतश्चान्यन्मृत्युर्विनाभगवत्तेजसश्चक्रापदेशात् ॥१४॥ यस्मिन्प्रविष्टे
ऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवंति ॥१५॥ अथातले मयपुत्रो
सुरोबलो निवसति येन ह वा इह सृष्टाः षण्णवति मायाः काश्चनाद्यापि मा
याविनो धारयंति यस्य च जृंभमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यं
त स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै विलायनं प्रविष्टं पुरुषं रसेन
हाटकाख्येन साधयित्वा स्वविलासावलोकनानुराग[illegible]स्मित
संलापोपगूहनादिभिः स्वैरं किल रमयंति यस्मिन्नुपयुक्ते पुरुष
ईश्वरोहं सिद्धोहमिति अयुतमहागजबलमात्मानमभिमन्यमा
नः कथ्यंते मदांध इव ॥१६॥ ततोधस्ताद्वितले हरो भगवान् हाट

शम्यो भयत्रापि भगवतो रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितम
स्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्त्तमानमभ्यवस्थितो मुहूर्त्तमुद्विज
मानश्चकितहृदय आरादेव निवर्त्तते तदुपरागमिति वदंति लोकाः॥
३॥ ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥४॥
ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमंतरि
क्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यंते ॥५॥ ततोऽधस्तात् शतयोजनां
तर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्त्रिप्रवरा उत्पतंतीति ॥६॥
उपवर्णितं भूमेर्यथासंनिवेशावस्थानमवनेरप्यधस्तात्सप्तभूविवराः
एकैकशो योजनायुतांतरेणायामविस्तारेणोपक्लृप्ताः अतलं वितलं सु
तलं तलातलं महातलं रसातलं पातालमिति ॥७॥ एतेषु हि बिलस्वर्गेषु

स्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिःसुसमृद्धभवनोद्यानाक्री
डाविहारेषुदैत्यदानवकाद्रवेयानित्यप्रमुदितानुरक्तकलत्रापत्यबं
धुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायाविनोदा
निवसंति॥८॥येषुमहाराजमयेनमायाविनाविनिर्मिताःपुरोना
नामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभा
चैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिका
कीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैःसमलंकृताश्चका
सति॥९॥उद्यानानिचातितरांमनइंद्रियानंदिभिःकुसुमफलस्तब
कसुभगकिसलयावनतरुचिरविटपविटपिनांलतांगालिंगिता

ण पार्श्वचक्रिषु वृत्ति लोभ्येन प्रयुंजीत शतभिक्षा ज्येष्ठे स्कंधयोर्दक्षि
णवावामयोर्न्यसेत् ॥६॥ उत्तराहनावगस्त्यरधराहनौयमःमुखेषु
चांगारकः प्राणैश्वरउपस्थे बृहस्पतिः ककुदि चंद्रसूर्यादित्यौ हृदयेना
रायणः मनसिचंद्रो नाभ्यामुशनाः स्तनयोरश्विनौ बुधः प्राणापान
योराहुर्गलेकेनवः सर्वांगेषु रोमसुसर्वेतारागणः ॥७॥ एतद्ध्वैव
वंभगवतोविष्णोःसर्वदेवतामयंरूपमहरहः संध्यायांप्रयतोवाग्यतो
निरीक्षमाणउपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमि
षांपतये महापुरुषायाभिधीमहीति ग्रहर्क्षताराममयमाधिदैवि
कंपहं मंत्रं त्रिकालं नमस्यतः स्मरतो वात्रिकालं नश्येत त्का

लजमाशुपापं॥२२॥ इतिश्रीभागवते महा० पंचमस्कंधे शिशुमारसंस्थानवर्णनं त्रयोविंशोध्यायः॥२३॥ एवं त्रिभिर्द्युमर्यादापालनेन तत्तपा अधोभुवनेमर्यादापालनं चिभिरुच्यते॥१॥ चतुर्विंशेखर्वीक स्वर्भान्वादिस्थितिः क्रमात् अतलादिविलस्वर्गमर्यादासं प्रवर्णिता। सूर्यमारभ्य ध्रुवांतं संनिवेशानिरूप्येदानीं सूर्यादधस्तान्निरूपयति॥२॥ ॥श्रीशुकउवाच॥ अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं चालभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः तस्य तातजन्मकर्माणि चोपरिष्टाद्वक्ष्यामः॥१॥ यदधस्तरणेर्मंडलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबंधः सूर्याचंद्रमसावभिधावति॥२॥ तन्नि

ग्रहनक्षत्रादीनामनिमेषेणाव्यक्तरंहसाभगवताकालेनभ्राम्यमाणा
नांस्थाणुरिवावष्टंभईश्वरेणविहितःशश्वदवभासते यथामे
ढीस्तंभआक्रमणपशवःसंयोजितास्त्रिभिःसवनैर्यथास्थानंमंडला
निचरंति॥२॥एवंभगणाग्रहादयएतस्मिन्नंतर्बहिर्योगेनकालच
क्रआयोजिताध्रुवमेवावलंब्यवायुनोदीर्यमाणाआकल्यांतंपरि
चंक्रमंति॥नभसियथामेघाश्येनादयोवायुवशाःकर्मसारथयः
परिवर्तंते एवंज्योतिर्गणाःप्रकृतिपुरुषसंयोगानुग्रहीताःकर्म
निर्मितगतयोभुविनपतंति॥३॥केचनैतज्ज्योतिरनीकंशिशुमार
संस्थानेनभगवतोवासुदेवस्ययोगधारणायामनुवर्णयंति॥४॥
यस्यपुछाग्रेऽवाकशिरसःकुंडलीभूतदेहस्यध्रुवउपकल्पितःतस्य

श्रीभा०पं०
६७

लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षय तस्य दक्षिणावर्त कुंडलीभूत शरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयंति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडली भोगसंनिवेशास्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति पृष्ठे त्वजवीथी आकाशगंगा चोदरतः॥५॥ पुनर्वसु पुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पश्चिमयोः पादयोः अभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथा संख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोः धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्वे च वंक्रिषु युंजीत तथैव मृगशीर्षादीन्युदगयनानि दक्षि

स्क०म०
६७

ग्रहोपशमनं ॥१२॥ उशनसा बुधो व्याख्यातः ततउपरिष्टात् द्विलक्षयो
जनतो बुधः सोमसुतउपलभ्यमानः प्रायेणशुभकृद्यदार्क्कात् व्यतिरि
च्यतेतदाऽतिवातात्रप्रायानावृष्ट्यादिभयमाशंसते ॥१३॥ अतउर्द्ध्वं मं
गारकोपियोजनलक्षद्वितयउपलभ्यमानोजनांतरगतोभगवान् बृहस्प
तिरेकैकस्मिन् राशौ भुज्यमानस्त्रिभिः पक्षैरेकैकशोराशीन्द्वादशानुभुं
क्ते यदि न वक्रेणाभिवर्त्तते प्रायेणाशुभग्रहोघशंस ॥१४॥ ततउपरिष्टात्
द्विलक्षयोजनांतरगतोभगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्स
रं परिवत्सरं चरति यदि न वक्रः स्यात्प्रायेणानुकूलब्राह्मणकुलस्य ॥
१५॥ ततउपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चरएकैक
स्मिन् राशौ त्रिंशत्त्रिंशमासान्विलंबमानः सर्वानेवानुपर्येति तावद्भि

श्रीभा०पं०
६६

रनुवत्सरै प्रायेणाहि सर्वेषामस्शांतिकरः॥१६॥ततउत्तरस्माद्दृषयएका
दशलक्षयोजनांतरउपलभ्यंते॥यएवलोकानांशमनुभावयंतोभग
वतोविष्णोर्यत्परमंपदंप्रदक्षिणंप्रक्रामंति॥१७॥इतिश्रीमद्भागवते
महापुराणेपंचमस्कंधेज्योतिश्चक्रवर्णनेद्वाविंशोतिमोध्यायः॥२२॥त्र
योविंशोध्रुवस्थानंज्योतिश्चक्रप्रयंततः शिशुमारस्वरूपेणहरेश्चास्थि
तिरुच्यते॥१॥ ॥श्रीशुकउवाच॥अथतस्मात्परतस्त्रयोदशलक्षयो
जनांतरतोयत्तद्विष्णोःपरमंपदमवदंति यत्रहमहाभागवतोध्रुव
उत्तानपादिरग्निनेंद्रेणप्रजापतिनाकश्यपेनधर्मेणचसमकालमु
ग्भिसबहुमानंदक्षिणतःक्रियमाणइदानीमपिकल्पजीवानामाजी
व्यउपासते तस्येहानुभावउपवर्णितः॥१॥सहिसर्वेषांज्योतिर्गणानां

श्रीभा०
६६

म तु गुणा विधाति ॥३॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचा
रानुपथ्या उच्चावचैः ॥ कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया जयंतो
जसा श्रेयः समधिगच्छति ॥४॥ अथ स एष आत्मा लोकानां द्यावापृथ्वि
व्योरंतरेण नभोवलयस्य कालचक्रगतो द्वादशमासान्भुंक्ते राशि
संज्ञान्संवत्सरावयवः ॥५॥ अथ चयावतार्द्धेन नभोवीथ्यां प्रचरति तं
कालं स्यनमाचक्षते ॥६॥ अथ चयान्नभोमंडलं सह द्यावापृथ्व्योर्मं
डलाभ्यां यावत्का स्न्येन सह भुंजीन तं कालं संवत्सरं इडावत्सरमनुवत्स
रमितिभानोर्मांधरैश्चस्समगतिभिः समामनंति ॥७॥ एवं चंद्रमा अर्क
गभस्तिभ्यः उपरिष्टात्तयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभु
क्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनेव पक्षभुक्तिं मग्रचारी द्रु

ततरगमनो भुंक्ते ॥८॥ अथ चापूर्यमाणाभिश्च कलाभिः अमराणां क्षीयमाणा
भिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वनः स
र्वजीवनिवहप्राणो जीवश्च एकमेकं नक्षत्रं त्रिंशता मुहूर्त्तैर्भुंक्ते ॥९॥
य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपि
तृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्स
र्वमय इति वर्णयंति ॥१०॥ तत उपरिष्टात् त्रिलक्षयोजनतो नक्ष
त्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टावि
शंतिः ॥११॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरत
पश्चात्सहैव वार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति लोका
नां नित्यदानुकूल एव प्रायेण वर्षातुचारेणानुमीयते स वृष्टिविष्टंभ

त्सवितुररुणः पश्चाच्चनियुक्तः सौत्येकर्मणिकिलास्ते ॥१७॥ तथावा
लखिल्या ऋषयोंगुष्टपर्वमात्राः षष्टिसहस्राणिपुरतः सूर्यंसूक्तवा
कायनियुक्ताः संस्तुवंति ॥१८॥ तथान्येच ऋषयोगंधर्वाप्सरसोनागा
ग्रामण्योयातुधानादेवाइत्येकैकशोगणाः सप्तचतुर्दशमासिमासि
भगवंतंसूर्यमात्मानंनानामानंपृथग्नमानः पृथक्कर्मभिर्द्वंद्वस उपा
सते ॥१९॥ लक्षोत्तरंसार्द्धनवकोटियोजनपरिमंडलंभूवलयस्य क्ष
णेनसगव्यूत्युत्तरंद्विसहस्रयोजनानिसभुंक्ते ॥२०॥ इतिश्रीमद्भाग
वतेमहापुराणेपंचमस्कंधेज्योतिश्चक्रसूर्यमंडलवर्णनंनामएक
विंशोध्याय ॥२१॥ द्वाविंशेसोमशुक्रादेः स्थानमहोत्तरोत्तरंनक्षत्र
त्रानुसारेणइष्टानिष्टतयानृणांराशीनांत्र्यभिमुखंचप्रदक्षिणंच

उपवर्णितंसव्येनचलन्नदक्षिणेनकरोतीतिवदताअमुष्यवयंकथमनुमिमी
महो॥१॥ ॥राजोवाच॥यदेतद्भगवतआदित्यस्यमेरुंध्रुवंचप्रदक्षिणे
नपरिक्रामतोराशीनामभिमुखंचप्रचलितंभगवतोपवर्णितममुष्यवयंक
थमनुमीमहीति॥१॥शुकउवाच॥यथाकुलालचक्रेणभ्रमतातदाश्रया
णांपिपीलिकादीनांगतिरन्यैवप्रदेशांतरेष्वप्युपलभ्यमानत्वात् एवंन
क्षत्रराशिभिरुपलक्षितेनकालचक्रेणध्रुवंमेरुंचप्रदक्षिणेनपरिधाव
मानानांतदाश्रयाणांसूर्यादीनांग्रहाणांगतिरन्यैवनक्षत्रांतरेराश्यंत
रेचोपलभ्यमानत्वात्॥२॥सएषभगवानादिपुरुषएवसाक्षान्नारायणो
लोकानांस्वस्तयआत्मानंत्रयीमयंकर्मविशुद्धिनिमित्तंकविभिरपिच
वेदेनविजिज्ञास्यमानोद्वादशधाविभज्यषट्सुवसंतादिषुयथोपजोष

ईंवधानीनामदक्षिणतोयाम्यंसंयमनीनामपश्चाद्वारुणींनिम्लोचनी
नामउत्तरतःसौम्यांविभावरीनामतासूदयमध्याह्नास्तमयनि
शीथानीतितिभूतानांप्रवृत्तिनिवृत्तिनिमित्तानिसमयविशेषेणमे
रोश्चतुर्दिशं॥३८॥तत्रत्यानांदिवसमध्यंगतएवसदादित्यस्तपति
सव्येनाचलंदक्षिणेनकरोति॥३९॥यत्रोदेतितस्यहसमानसूत्रनि
पातेनिम्लोचतियत्रक्वचनस्यंदेनाभितपतितस्यहैषसमानसू
त्रनिपातेप्रस्वापयतितत्रगतंनपश्यंतियेतंसमनुपश्येरन्॥४०॥
यदाचेंद्र्याःपुर्याःप्रचलतेपंचदशघटिकाभिर्याम्यांसपादकोटि
द्वयंयोजनानांसार्द्धद्वादशलक्षाणिसाधिकानिचोपयाति॥४१॥
एवंततोवारुणींसौम्यामैंद्रींचपुनस्तथाऽन्येचग्रहाःसोमादयोनक्ष

त्रैः सहज्योति ॥ श्चक्रे समभुद्यंति सहवा निम्लोचंति सहवा निम्लोचं
ति ॥१२॥ एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि
सौरो रथस्त्री[illegible]मयो सौ चतसृषु परिववर्तते पुरीषु ॥१३॥ यस्यै
कं चक्रं द्वादशारं षण्नेमि त्रिनाभि संवत्सरात्मकं समामनंति ॥ त
स्याक्षो मेरोर्मूर्द्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविर
थचक्रं तैलयंत्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥१४॥ त
स्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयंत्राक्ष
वद्ध्रुवे कृतोपरिभागः ॥१५॥ रथनीडस्तु षट्त्रिंशल्लक्षयोज
नायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाः छं
दोनामानः सप्तारुणयोजिता वहंति देवमादित्यं ॥१६॥ पुरस्ता

हिविभज्यंते दिशः खंद्यौर्मही भिदा ॥ स्वर्गापवर्गौ नरकारसौकांसि चसर्वशः ॥४५॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधां ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥४६॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णने समुद्रपरषे निशरिणो नामविंशतमोऽध्यायः ॥२०॥ एवमध्याविंशस्याभूमर्यादानिरूपिता ॥ अतःपरं धुमर्यादापालनं त्रिभिरूच्यते ॥ एकविंशे खेः कालचक्रेण भ्रमतो च हं स्वगतसारा शिसंचारैर्लोकयात्रा निरूप्यते ॥१॥ ॥ श्रीशुकउवाच ॥ एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्षणतो व्याख्यातः ॥ एतेन हि दिवोमंडलमानं तद्विद उपदिशंति ॥१॥ यथा द्विदलयो र्निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितं ॥२॥ यन्मध्यगतो

श्री भा० पं०
६१

भगवांस्तपतांपतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभा
सा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभि
र्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो
मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते॥३॥यदा मे
षतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवंति यदा वृषभादि
षु पंचसु च राशिषु चरति तदाहान्येव वर्द्धते ह्रसति च मासि मास्येकै
का घटिका रात्रिषु॥४॥यदा वृश्चिकादिषु पंचसु वर्त्तते तदाहोरा
त्राणि पर्ययाणि भवंति॥५॥यावद्दक्षिणायनमहानि वर्द्धंते यावदुदग
यनं रात्रयः॥६॥एवं नवकोटय एकपंचाशल्लक्षाणि च योजनानां मान
सोत्तरगिरिपरिवर्तनस्योपदिशंति॥तस्मिन्नैंद्रीं पुरीं पूर्वस्मान्मेरो

राम०
६२

लभ्यते तस्मात्सर्वसत्वपरिहृताऽसीत् ॥३६॥ लोकालोक इति समाख्या
यदनेनाचलेन लोकालोकस्यांतर्वर्तिनाऽवस्थाप्यते ॥३७॥ सलोकयांते
परित ईश्वरेणविहित यस्मात्सूर्यादीनांध्रुवापवर्गाणां ज्योतिर्गणा
नांगभस्तयोर्वाचीनास्त्रींल्लोकानावितन्वानानकदाचित्पराचीनाभ
वितुमुत्सहंते।तावदुन्नहनायाम॥३८॥एताव्वाल्लोकविन्यासोमान
लक्षणसंस्थाभिर्विचितिंचः कविदापंचाशत्कोटिगणितस्यभूगो
लस्यतुरीयभागोयंलोकालोकाचलः॥३९॥तदुपरिष्टाच्चतसृष्वा
स्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशितायेद्विरदपतयःऋष
भःपुष्करचूडोवामनोपराजितइतिसकललोकस्थितिहेतव॥४०॥
तेषांस्वविभूतीनांलोकपालानांविविधवीर्योपबृंहणायभगवान्

रममहापुरूषोमहाविभूतिपतिरंतर्याम्यात्मनोविशुद्धसत्वंधर्मज्ञानवै
राग्यैश्वर्याद्यष्टमहासिध्युपलक्षणोविष्वकसेनादिभिःस्वपार्षदप्रवरैः
परिवारितोनिजवरायुधोपशोभितैर्निजभुजदंडैःसंधारयमाण
तस्मिन्गिरिवरेसमंततःसकललोकस्वस्तयेआस्ते॥४०॥आकल्पमे
षंवेषंगतएवंआत्मयोगमाययाविरचितविविधलोकयात्रागोपा
य॥४१॥योंतर्विस्तारएतेनह्यलोकपरिमाणंचव्याख्यातंयद्बहिर्लो
कालोकाचलात्ततःपरस्ताद्योगेश्वरगतिंविशुद्धामुदाहरंति॥४२॥
अंडमध्यगतःसूर्योद्यावाभूम्योर्यदंतरं सूर्यांडगोलयोर्मध्येको
ट्यःस्युःपंचविंशतिः॥४३॥मृतेंडएषएतस्मिन्यदभूत्ततोमार्तंडइ
तिव्यपदेशः हिरण्यगर्भइतियद्धिरण्यांडसमुद्भवः॥४४॥सूर्येण

रुषारुन व्रत सत्स व्रत दान व्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्रा
णायाम विधूतरजस्तमसः परमसमाधिना यजंते ॥२८॥ अंतः प्रविश्य
भूतानियो विभर्त्यात्मकेतुभिः अंतर्यामीश्वरः साक्षात्पातुनोयद्वशे
स्फुटं ॥२९॥ एवमेव दधिमंडोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः
समंततउपकल्पितः समानेन स्वादुदकेन समुद्रेण बहिरावृत यस्मि
न्बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कम
लासनस्याध्यासनं परिकल्पितं तद्द्वीपमध्ये मानसोत्तरनामेकए
वार्वाचीनपराचीनवर्षयोर्मर्यादाचलोयुतयोजनोच्छ्रायायामो यत्र
तुचतसृषुदिक्षुचत्वारिपुराणिलोकपालानांइंद्रादीनांयदुपरिष्टा

भा०पं०
६

त्सूर्यरथस्य मेरूं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यांप
रिभ्रमति ॥३०॥ एतद्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्म
जौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगव
त्कर्मशील एवास्ते ॥३१॥ तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मके
न कर्मणाऽऽराधयंतीदं चोदाहरंती ॥३२॥ यत्तत्कर्ममयं [illegible] लिं
गं जनोऽर्चयेत् एकांतमद्वयं शांतं तस्मै भगवते नम इति ॥३३॥ ऋषिरु
वाच ॥ ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरंतराले प
रित उपक्षिप्तः ॥३४॥ यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः कांच
न्यऽन्यादर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युप

हरेः
६०

धिपतिः स्वेतद्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादा
न्वर्षपान्निवेश्य स्वयं भगवान्भगवतः परमकल्याणयशस आत्मभू
तस्य हरेश्चरणारविंदमुपजगाम ॥२०॥ आमो मधुरुहो मेघपृष्ठः सु
धामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्ष
गिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्द्धमानो भोजन उपब
र्हिणो नंदो नंदनः सर्वतोभद्र इति ॥२१॥ अभयामृतौघा आर्यका तीर्थव
ती वृत्तिरूपवती पवित्रवती शुक्लेति यासामंभः पवित्रममलमुपयुं
जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां
पूर्णेनांजलिना यजंते ॥२२॥ आपः पुरुषवीर्याः स्थ पुनंतीर्भूर्भुवः स्व
स्ता नः पुनीतामीवघ्नीः स्पृशतात्मना भुव इति ॥२३॥ एवं परस्ताद्

क्षीरोदात्परितः उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः स
मानेनचदधिमंडोदेनपरितः यस्मिन्हिशाकोनाममहीरुहः स्वक्षे
त्रव्यपदेशकोयस्यहमहासुरभिगंधस्तंद्वीपमनुवासयति ॥२४॥ त
स्यापिप्रैयव्रत एवाधिपतिर्नाम्नामेधातिथिः सोपिविभज्यसप्तवर्षा
णिपुत्रनामानितेषुस्वात्मजान्पुरोजवमनोजवपवमानधूम्रा
नीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन्स्वयंभ
गवत्यनंतआवेशितमतिस्तपोवनंप्रविवेश ॥२५॥ एतेषांवर्षमर्या
दागिरयोनद्यश्चसप्तसप्तैव ईशानउरुशृंगोबलभद्रः शतकेशरः
सहस्रस्रोतः देवपालोमहानस इति ॥२६॥ अनघाआयुर्दाउभयसृ
ष्टिरपराजितापंचपदीसहस्रस्रुतिर्निजधृतिरिति ॥२७॥ तद्वर्षपु

र्षं सुसीमा गिरयो नद्यश्चाभिज्ञाताः सप्तैव वक्रश्चतुःशृंग कपिलश्चित्र
कूटो देवानीक ऊर्द्ध्वरोमा द्रविण इति ॥१५॥ रसकुल्यामित्रविंदाश्रुतविं
दा देवगर्भा घृतच्युता मंत्रमालेति यासां पयोभिः कुशद्वीपौकसः कुश
लकोविदाभियुक्तकुलकसंज्ञा भगवंतं जातवेदसरूपिणं कर्मकौशले
न यजंते ॥१६॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् देवानां पु
रुषांगानां यज्ञेन पुरुषं यजेति ॥१७॥ तथा बहिः क्रौंचद्वीपो द्विगुणः स्व
मानेन क्षीरोदेन परित उपक्लृप्तः वृतो यथा कुशद्वीपो घृतोदेन यस्मि
न् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥१८॥ यो सौ गुहप्रह
रणोन्मथितनितंबकुंजोपि क्षीरोदेनासिच्यमानो भगवता वरुणेना
भिगुप्तोऽविभयो बभूव ॥१९॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामा

सप्तैवाभिज्ञाताः स्वरसः शतशृंगो वामदेवः कुंदः कुमुदः पुष्पवर्षः पारिभद्रमा
स्रो सहस्रश्रुतिरिति अनुमतीशिनीवाली सरस्वती कुहूरजनी नंदा राकेति
॥१०॥ तद्वर्षपुरुषाः श्रुतधर वीर्यधर वसुंधररेषधर संज्ञा भगवंतं वेदमयं
सोममात्मानं वेदेन यजंते ॥११॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्ल
योः प्रजानां सर्वासां राजांधः सोमो न आस्त्विति ॥१२॥ एवं सुरोदाद्बहि
स्तत् द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुश
स्तंबो देवकृतस्तत् द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दि
शो विराजयति ॥१३॥ तत् द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेतो नामा
स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्टत ॥१४॥
वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनामभ्यः तेषां व

स्वर्गद्वारं प्रपद्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते ॥४॥ प्रत्नस्य विष्णोः रूपं यत्सत्यस्यर्तस्य ब्रह्मणः अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥५॥ प्लक्षादिषु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च ॥ सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण प्रवर्तते ॥६॥ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपो पि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृंक्ते ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतः छंदःस्तुतः पतत्त्रिराजस्य सा द्वीपहूतये उपलक्षते ॥७॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत्सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥९॥ तेषु वर्षाद्रयो नद्यश्च

स्यातेन परिक्षिप्तो यथा परवाह्ये पवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्याक
रो हिरण्मय उपस्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रिय
व्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि ~~तेषु गिरयो नद्यश्च सप्तैवाभि~~
~~ज्ञाता ॥२॥ मणिकूटो वज्रकूटः इंद्रसेनो~~ विभज्य सप्त वर्षनामभ्य आत्म
जेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥२॥ शिवं यवसं सुभद्रं शांतं
क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाता ॥३॥
मणिकूटो वज्रकूटः इंद्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमा
ल इति सेतुशैलाः अरुणा नृम्णा गिरसी सावित्री सुप्रभाता ऋतंभरेति
महानद्यः यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्द्ध्वायनस
त्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः

श्रीभा०पं०
५६

राजन्नुपद्वीपानष्टौ हैक उपदिशंति सगरात्मजैरश्वान्वेषण इमं महीं परि
तो निषनद्भिरुपकल्पितान् ॥ ३१ ॥ तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त
नो रमणको मंदराहरिणः पांचजन्यः सिंहलो लंकेति ॥ ३० ॥ एवं तव भा
रतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥ इति
श्रीमद्भागवते महापुराणे पंचमस्कंधे जंबूद्वीपवर्णनं नाम एकोनविं
शोध्यायः ॥ १९ ॥ विंशे प्लक्षादिषट् द्वीपस्थितिमाह सहार्णवैः लोकालो
कस्थितिं चांतर्वहिर्भागादिमानतः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ अतः प
रं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥
१ ॥ जंबूद्वीपोयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवे
ष्टितो यथा मेरुर्जंब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्ल

प्लक्ष०
५६

स्यानजयात्पुनर्भवात् क्षणायुषांभारतभूजयोवरं॥क्षणेनमर्त्येनकृतंम
नस्विनःसन्यस्यसंयांत्यभयंपदंहरे॥२३॥नयत्रवैकुंठकथासुधापगानसा
धवोभागवतास्तदाश्रयाः॥नयत्रयज्ञेशमखामहोत्सवाःसुरेशलोको
पिनवैससेव्यतां॥२४॥प्राप्तान्नजातिंत्विहयेचजंतवोज्ञानक्रियाद्रव्य
कलापसंभृतां॥नवैयतेरन्नपुनर्भवायतेभूयोवनौकाइवयांतिबंध
नं॥२५॥यैःश्रद्धयावर्हिषिभागशोहविर्निरूप्तमिष्टंविधिमंत्रवस्तुतः॥ए
कःपृथक्नामभिराहुतोमुदागृह्णातिपूर्णःस्वयमाशिषांप्रभुः॥२६॥सत्यं
दिशत्यर्थितमर्थितोनृणांनैवार्थदोयत्पुनरर्थितायतः॥स्वयंविधत्ते
भजतामनिछतांइछापिधानंनिजपादपल्लवं॥२७॥यद्यत्रनस्वर्गसु
खावशेषितंस्विष्टस्यसूक्तस्यकृतस्यशोभनं॥तेनाजनाभेस्मृतिमज्जन्म
नःस्याद्वर्षेहरिर्यद्भजतांशंतनोति॥२८॥श्रीशुकउवाच॥जंबूद्वीपस्यच

४ वर्कीणांमर्यादागिरयः प्रागायता उभयतः नीरोदावधयो ... ४

मूर्द्ध द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशयोजनसाहस्रं ताव
तांतर्भूम्यां मर्यादागिरयः प्रागायता उभयता उभयतः नीरोदावध
यो प्रविष्टउत्तरोत्तरेणेलावृतं नील श्वेत शृंगवानिति त्रयो रम्यक
हिरण्मय कुरूणां द्विसहस्र पृथक एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरो
दशांशाधिकांशेन दैर्घ्य एव ह्रसंति ॥८॥ एवं दक्षिणेनेलावृतं निष
ध हेमकूटो हिमलय इति प्रागायता यथा नीलायत ऋयुतयोजनउ
त्सेधा हरिवर्षं किंपुरुष भरतानां यथा संख्यं ॥९॥ तथैवेलावृतमपरेण
पूर्वेण च माल्यवद्गंधमादनानीलनीषधायतो द्विसहस्रं पप्रथ
यतु ॥१०॥ केतुमाल भद्राश्वयोः सीमानं विदधाते ॥११॥ मंदरो मेरुमं

भा०पं०
४३

दरः सुपार्श्वः कुमुद इति अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमव
ष्टंभगिरय उपकॢप्ता ॥१२॥ चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधा
श्चत्वारः पादपप्रवराः पर्वतकेतव इवैं सहस्रयोजनोन्नाहास्तावद्विट
पविततयाः शतयोजनपरिणाहा ॥१३॥ ह्रदाश्चत्वारः पयोमधुइक्षुरसा
मृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि
भरतर्षभ धारयंति ॥१४॥ देवोद्यानानि च भवंति चत्वारि नंदनं चैत्र
रथं वैभ्राजकं सर्वतोभद्रमिति ॥१५॥ येष्वमरपरिवृढाः सहसुरललना
ललामयूथपतयः ॥ उपदेवगणैः रुपगीयमानमहिमानः किल विहरंति
१६॥ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरिशि
खरस्थूलानि फलान्यमृतकल्पानि पतंति ॥१७॥ तेषां विशीर्णमाणा

२ शाल

हरे०
४३

नं अतिमधुरसुरभिवद्धलारूणरसोदेनइणो हनामनदीमंदर
गिरिशिखरान्निपतंती पूर्वे लेलाहृतनमुपह्लावयति ॥१८॥ यदुषजो
षणाङ्गवान्याश्रनुवेरीणां पुण्पजनवधूनामवयवस्पर्शसुगंध
वातोदशयोजनेसमंतादुनुवासयति ॥१९॥ एवंजंबूफलानामं
तपूर्वेपाततविशीर्णानामनस्थिप्राणायामिभकायनिनाभानांरसे
नजंबूनामनदीमेरूमंदरशिखरादयुतधिकयोजनारवनित
लेनिपतंतीदक्षिणेनात्मानंयावदिलाहृतनमुपस्पंदति ॥२०॥ तावदुभयो
रपिरोधसोर्यामृतिकारसेनानुविध्यमानावाद्यर्कसंयोगविपाकेन
सदामरलोकाभरणंजांबूनदंनामसुवर्णंभवतियदुह वावविंधाद

बु

यः सहयुवतिभिर्मुकुटकटिसूत्राद्याभरणरूपेण खलु धारयंति ॥२२॥
यस्तु महाकदंबः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पंचा
यामपरिणाहाः पंचमधुधाराः सुपार्श्वशिखरात्पतंत्योपरेणात्मानमिला
वृतमनुमोदयंति ॥२३॥ या ह्युपयुंजानानां मुखनिर्वासितो वायुः समंता
च्छतयोजनमनुवासयति ॥२४॥ एवं कुमुदनिरूढो यः शतवलो नाम वटो
स्तस्य स्कंधेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यास
नाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेला
वृतमुपयोजयंति ॥२५॥ यानुपजुषाणानां न कदाचिदपि प्रजानां वलि
पलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्यापसर्गादयस्ता

पविशेषायभवंतियावज्जीवसुखंनिरतिशयमेव॥२६॥कुरंगकुंदर
कुसंगवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशितिवासकपि
लशंखवैडूर्य्यजारुधिहंसर्षभनागकालंजरनारदादयोविंशतिगिरयो
मेरोकर्णिकाइवकेशरभूतामूलदेशेपरितउपक्लृप्ताः॥२७॥जठरदेव
कुटौपूर्वेणाष्टादशयोजनसहस्रमुदगायतौद्विसाहस्रपृथुतुंगौभ
वतःएवमपरेणपवनपारियात्रौदक्षिणेनकैलाशकरवीरौप्राग्यतौ
एवमुत्तरतस्त्रिशृंगमकरौअष्टाभिरेतैःपरिसृतोग्निरिवपरितश्च
कास्तिकांचनगिरिः॥२८॥मेरोर्मूर्द्धिभगवतआत्मयोनेर्मध्यतउपक्लृ
प्तांपुरीमयुतयोजनसहस्रांसमचतुरस्रांशातकौंभीवदंति॥२९॥ताम
नुपरितोलोकपालानामष्टानांयथादिशंयथारूपंतुरीयभोगेनपुरोवु

भा॰पं॰
८५

फलोपस्ता॥३०॥इतिश्रीमद्भागवतेमहापुराणेपंचमस्कंधेभुवनसंस्थानंनाम
षोडशोध्यायः॥१६॥श्रीशुकउ॰ ततस्सप्तदशे गंगागमनंचतुर्दिशं॥इलावृ
तेचरुद्रेणसंकर्षणनिषेवणं॥१॥ ॥श्रीशुकउवाच॥तत्रभगवतसाक्षा
द्यज्ञलिंगस्यविष्णोर्विक्रमतोवामपादांगुष्ठनिभिन्नोर्द्ध्वांडकटाह
विवरेणांतःप्रविष्टायाबाह्यजलधारातच्चरणपंकजावनेजनारुण
किंजल्कोपरंजिताजगदघमलापहोस्पर्शनसाक्षाद्भगवत्पदीत्यनु
पलक्षितवचोऽभिधीयमानातिमहताकालेनयुगसहस्रोपलक्षणे
नदिवोमूर्द्धन्यवततार॥१॥यंतद्विष्णुपदमाहुः यत्रहवाववीरव्रतऔ
त्तानपादिःपरमभागवतोऽस्मत्कुलदेवताचरणारविंदोदकमितिया
नुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदयऔ

हरम॰
८५

त्वं च विवशआमीलितलोचनयुगलकुड्मलविगलितामलवा
ष्पकलयाभिमज्यमानरोमपुलककुलकोऽधुनापिपरमादरेण
शिरसाबिभर्त्ति ॥२॥ ततऋषयस्तत्प्रभावाभिज्ञायांननुतपस
आत्यंतिकीसिद्धिरेतावतीभगवतिसर्वात्मनिवासुदेवेउपरत
भक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयोमुक्तिमिवागतांमुमु
क्षवइवसबहुमानमद्यापिजटाजूटैरुद्वहंति ॥३॥ ततोनेकसहस्रको
टिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलब्रह्मसदनेनिप
तति ॥४॥ तत्रचतुर्द्धाभिर्नामभिश्चतुर्दिशमभिस्पंदतींनदनदीपति
मेवाभिनिविशति ॥५॥ सीतालकनंदाचक्षुर्भद्रेति सीतातुब्रह्मसद

नात्केसराचलादिगिरिशिखरेभ्योऽधोऽधप्रस्रवंतीगंधमादनमूर्द्धसु
पतित्वांतरेणभद्राश्ववर्षंप्राच्यांदिशिरसामुद्रमभिप्रविशति॥६॥
एवंमाल्यवतःशिखरान्निपतंतीततोऽपरतवेगाकेतुमालमभिचक्षु
श्चःप्रतीच्यांदिशिसमुद्रमभिप्रविशंति॥७॥भद्राचोत्तरतोमेरुशिर
सोनिपतितागिरिशिखरमतिहायशृंगवतःशृंगादवस्यंदमाना
उत्तरांस्तुकुरूनभितउदीच्यांदिशिजलधिमभिप्रविशति॥८॥त
थैवालकनंदादक्षिणेनब्रह्मसदनाद्बहूनिगिरिकूटान्यतिक्रम्यहे
मकूटाद्धैमकूटान्यतितरंरहसालुठयतिभारतमभिवर्षंदक्षिणस्यांदिशि
जलधिमभिप्रविशति॥९॥यस्यांस्नानार्थंवागच्छतःपुंसःपदेऽश्वमेधरा

नसूर्यादीनांफलंनदुर्ल्लभमिति॥ अन्येचनदानद्यश्चवर्षेवर्षेसंति
बहुशोमेर्वादिगिरिदुहितरश्शतशः॥१०॥ तत्रापिभारतमेववर्षंक
र्म्मक्षेत्रमन्यान्यष्टवर्षाणिस्वर्गिणांपुण्यशेषोपभोगस्थानानिभौमानि
स्वर्गपदानिव्यपदिशंति॥११॥ एषुपुरुषाणामयुतंपुरुषाणांदेवकल्पा
नांनागायुतप्राणानांवज्रसंहननबलवयोमोदप्रमुदितमहासौरत
मिथुन[व्य]वायापवर्गवर्षधृतैकगर्भकलत्राणांतत्रतुत्रेतायुगसमःका
लोवर्त्तते॥१२॥ यत्रहदेवपतयःस्वैःस्वैःगणनायकैर्विहितमहार्ह
णाःसर्वर्तुकुसुमस्तबकफलकिसलयश्रियानम्यमानविटपलता
विटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणी

भृतयाचामलजलाशयेषु विकचविविधनववनरुहामोदमुदमु
दितराजहंसजलकुकुटकारंडवसारसचक्रवाकादिभिर्मधुकर
निकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सु
ललितसुरसुंदरीणां कामकलिलविलासहासलीलावलोका
कृष्टमनोदृष्टयः स्वैरं विहरंति ॥१३॥ नवस्वपि वर्षेषु भगवान्नारायणो
महापुरुषपुरुषाणां तदनुग्रहायात्मतत्वव्यूहेनात्मनाद्यापि
संनिधीयते ॥१४॥ इलावृते तु भगवान्भव एक एव पुमान्न ह्यन्यस्त
त्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतः स्त्रीभावस्तत्प
श्चाद्वक्ष्यामि ॥१५॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्य
मानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृति

मात्मन संकर्षणसंज्ञमात्मसमाधिरूपेण संनिधाप्यैतदभिगृण
न्नुपधावति ॥१६॥ श्रीभगवानुवाच ॥ ॐ नमो भगवते महापुरुषा
य सर्वगुणसंख्यानायानंतायाव्यक्ताय नम इति ॥१७॥ भजे भजन्या
रणपादपंकजं भगस्य कृत्स्नस्य परं परायणं ॥ भक्तेष्वलं भावि
तभूतभावनं भवापहं त्वा भवभावमीश्वरं ॥१८॥ न यस्य मायागु
णचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ॥ ईशे यथा नो
ऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥१९॥ असद्दृशो यः
प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोऽर्हण
ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेंद्रियाः ॥२०॥ यमाहुरस्य स्थिति

जन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः॥ न वेद सिद्धार्थमिव क्वचित्स्थि
तं भूमंडलं मूर्द्धसहस्रधामसु॥२१॥ यस्याद्य आसीद्गुणविग्रहो महान्
विज्ञानधिष्ण्यो भगवानजः किल॥ यत्संभवोहं त्रिवृता स्वतेजसा वैका
रिकं तामसमैंद्रियं सृजे॥२२॥ एते वयं यस्य वशे महात्मनः स्थिताः शकुं
ता इव सूत्रयंत्रिताः॥ महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनु
ग्रहादिदं॥२३॥ यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोयं गुणसर्ग
मोहितः॥ न वेद निस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने॥
२४॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे सप्तदशोध्यायः॥१७॥ ॥अष्टा
दशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनं॥१॥
॥ ॥श्रीशुक उवाच॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतय

पुरुषांभद्राश्ववर्षेसाक्षाद्भगवतोवासुदेवस्यप्रियांतनूंधर्ममयींहय
शीर्षाभिधानांपरमेणसमाधिनासंनिधाप्येदमभिगृणंतउपधावं
ति॥१॥भद्रश्रवासऊचुः॥ॐनमोभगवतेधर्मायात्मविधनीयन
मइति॥२॥अहोविचित्रंभगवद्विचेष्टितंघ्नंतंजनोयंहिमिषन्नप
श्यति॥ध्यायन्नसद्यर्हिविकर्मसेवितुंनिर्हत्यपुत्रंपितरंजिजीव
िषु॥३॥वदंतिविश्वंकवयःस्मनश्वरंपश्यंतिचाध्यात्मविदोविप
श्चितः॥तथापिमुह्यंतितवाजमाययासुविस्मितंकृत्यमजंनतोस्मि
तं॥४॥विश्वोद्भवस्थाननिरोधकर्मतेह्यकर्त्तुरंगीकृतमप्यपावृत॥
युक्तंनचित्रंत्वयिकार्यकारणेसर्वात्मनिव्यतिरिक्तेचवस्तुतः॥५॥वेदा

श्रीभा०पं०
४९

न्युगांतेतमसातिरस्कृतानूरसातलाद्योन्कतुरंगविग्रहः॥ प्रत्याद
दैवैकवयोभियाचतेतस्मैनमस्तेवितषेहितायत इति॥६॥हरि
वर्षेचापिभगवन्नरहरिरूपेणचास्तेतद्रूपग्रहणनिमित्तमुत्तर
त्रभिधास्येत द्दयितंरूपंमहापुरुषगुणभाजनोमहाभागवतोदैत्य
दानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोव्यवधानानन्यभ
क्तियोगेनसहतद्वर्षपुरुषैरुपास्तेइदंचोदाहरंति॥७॥नमोभग
वतेनरसिंहायनमस्तेजस्तेजसे आविराविर्भववज्रदंष्ट्रकर्मा
शयान्रंधयतमोग्रसग्रसउँस्वाहा अभयमभयमात्मनिभूयिष्ठा
उँक्षौं॥८॥स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायंतुभूतानिशिवं
मिथोधिया॥मनश्चभद्रंभजतादधोक्षजेआवेश्यतानोमतिरप्य

ह्र०स्क०
४९

हैतुकी ॥९॥ मागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रिये
षु नः ॥ यः प्राणवृत्त्या परितुष्ट आत्मवान्सिध्यत्यदूरान्नतथेंद्रियप्रियः ॥१०॥
यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं ॥ हरत्य
जोंतः श्रुतिभिर्गतोंगजं को वै न सेवेत मुकुंदविक्रमं ॥११॥ यस्यास्ति भक्ति
र्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य कुतो म
हद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥ हरिर्हि साक्षाद्भगवच्छरी
रिणामात्मा झषाणामिव तोयमीप्सितं ॥ हित्वा महांस्तं यदि सज्जते
गृहे तदा महत्त्वं वयसा दंपतीनां ॥१३॥ तस्माद्रजोरागविषादम
न्युमानस्पृहाभयदैन्याधिमूलं ॥ हित्वा गृहं संसृतिचक्रवालं नृसिं
हपादं भजतांकुतोभयमिति ॥१४॥ केतुमालेपि भगवान्कामदेवस्वरूपे

णलक्ष्म्याः प्रियचिकीर्षया॥ प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषा
युषाहोरात्रयस्मिंख्यातानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्विजितमन
सां विध्वस्ता व्यसवः संवत्सरांते निपतंति॥१५॥ अतीव सुललितगतिविला
सविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंड
लसुभगवदनारविंदश्रिया रमां रमयन्निंद्रियाणि रमयते॥१६॥ तद्भग
वतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजा
पतेर्दुहितृभिरुपेताहस्सु तद्भर्तृभिरुपास्ते इदं चोदाहरंति॥१७॥ ॐ ह्रां
ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षिता
त्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकला
य छंदोमयायान्नमयायामृतमयाय सर्वैमयाय सर्वमयाय सहसे ओ

जसे बलाय कंताय कामाय नमस्तेउभयत्र भूयात् ॥१८॥ स्त्रियो व्रतै स्त्वा हृषि
केश्वरं स्वतो ह्याराध्य लोके पतिमासतेन्यं ॥ तासां न ते वै परिपांत्यपत्यं प्रियं
धनायूंषि यतो स्वतंत्रा ॥१९॥ स वै पतिः स्याद कुतोभयं समंततः पाति भयातु
रं जनं ॥ स एक एवेतरथा मिथो भयं नैवात्म लाभाद धिमन्यते परं ॥२०॥
यातस्य ते पादसरोरु हार्हणं नि कामयेत्साखिलकामलंपटा ॥ तदेव
रासी प्सितो र्चितो यद्भग्नयाञ्चा भगवन्प्रतप्यते ॥२१॥ मत्प्राप्तये जेशसुरा
सुरादयस्तप्यंत उग्रं तप ऐंद्रिये धियः ॥ ऋते भवत्पाद परायणान्न मां विं
दंत्यहं त्वद्हृदया यतो ऽजित ॥२३॥ स त्वं ममाप्यच्युत शीर्ष्णि वंदितं क
रांबुजं यत्त्वदधायि सात्वतां ॥ विभार्षि मां लक्ष्म वरेण्य मायया क ईश्व

रस्ये हितमूहितुं विहरतीति ॥२३॥ रम्यके च भगवतः प्रियतमं मात्स्यमवता
ररूपं तद्वर्षपुरुषस्य मनोः ॥ प्राक् प्रदर्शितं स इदानीमपि महाभक्ति
योगेनाराधयंतीदं चोदाहरति ॥२४॥ ॐ नमो भगवते मुख्यतमाय
नमः सत्वाय प्राणायोजसे सहसे बलाय महामत्स्याय इति ॥२५॥ अंतर्ब
हिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वन ॥ स ईश्वरस्त्वं
य इदं वशेनयन्नाम्नाय यथा दारुमयीं नरः स्त्रियः ॥२६॥ यं लोकपालाः
किल मत्सरज्वरा हित्वा यतंतोपि पृथक् समेत्य च ॥ यातुं न शेकुर्द्विप
दश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥२७॥ भवान्युगांतार्णव
ऊर्म्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिं ॥ मयासहोरुक्रमते
ज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ॥२८॥ हिरण्मयेपि भग

वान्निवसति कूर्म्मतनुं विभ्राणस्तस्यतत्प्रियतमांतनुमर्यमासहवर्षपुरु
षैः पितृगणाधिपतिरूपधावतिमंत्रमिमंचानुजपति॥२९॥ॐनमो
भगवतेऽकूपारायसर्व[illegible]सत्वगुणविशेषणायनोपलक्षितस्था
नायनमोवर्ष्मणेनमोभूम्नेनमोवस्थानायनमस्ते॥३०॥यद्रूपमेत
न्निजमाययार्पितमर्थस्वरूपरूपितं॥संख्यानयस्यास्त्ययथोप
लंभनात्तस्मैनमस्तेव्यपदेशरूपिणे॥३१॥जरायुजंस्वेदजमंडजो
द्भिजंचराचरंदेवर्षिपितृभूतमैंद्रियं॥द्यौःखंक्षितिःशैलसरित्समुद्र
द्वीपग्रहर्क्षेत्यभिधेयएकः॥३२॥यस्मिन्नसंख्येयविशेषनामरूपाकृ
तौकविभिःकल्पितेयं॥संख्याययातत्वदृशापनीयतेतस्मैनमःसांख्य

प श्रीभा० पं०
५२

निदर्शनायतन इति ॥३३॥ उत्तरेषु च कुरुषु भगवान्यज्ञपुरुषः कृतवासराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्त्तयति ॥३४॥ ॐ नमो भगवते मंत्रतत्वलिंगाय यज्ञकृतवे महाऽध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥३५॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारूष्वि व जातवेदसं ॥ मथ्नंति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥३६॥ द्रव्यक्रियाहेत्वयनेशकर्त्तृभिर्मायागुणैर्वस्तु निरीक्षितात्मने ॥ अन्वीक्षयांगातिशयात्मबुद्धिभिर्निरस्तमायाकृते नमो नमः ॥३७॥ करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ॥ मायायथायो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥३८॥ प्रमथ्य दैत्यं प्रति

कृष्ण०
५२

वारणेमघेयोमांरसायाजागदादिष्वकरैः॥हत्वाग्रदंष्ट्रनिरगादुदन्वतः
क्रीडन्निवेभःप्रणतास्मितंविभुमिति॥२९॥इतिश्रीमद्भागवतेमहापुरा
णेपंचमस्कंधेभुवनकोशवर्णनेअष्टादशोध्यायः॥१८॥श्रीशुक उवाच किंपुरु
षेभारतेचोपवर्ण्यतेसेव्यसेवकभावश्रभारतश्रेष्ठनमेवच॥१॥ ॥
श्रीशुकोवाच॥किंपुरुषेवर्षेभगवंतंआदिपुरुषंलक्ष्मणाग्रजंसी
ताभिरामंरामंतच्चरणसंनिकर्षाभिरतःपरमभागवतोहनुमान्स
हकिंपुरुषेरविरतभक्तिरुपास्ते॥१॥आर्ष्टिषेणेनसहगंधर्वैर
नुगीयमानांपरमकल्याणीभर्तृभगवत्कथांसमुपशृणोतिस्वयंवे
दंगायति॥२॥ॐनमोभगवतेउत्तमश्लोकायनमआर्यलक्षणशीलव्र
तायनमउपशिक्षितात्मनेउपासितलोकायनम॥साधुवादनिकर्षणा

यनमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥३॥ यत्तद्विशु
द्धानुभवमात्रमेकं स्वतेजसाध्वस्तगुणव्यवस्थं प्रशांतं सुधियोप
लंभनं ह्यनामरूपं निरहं प्रपद्ये ॥४॥ मर्त्यावतारस्त्विह मर्त्यशिक्षणं
रक्षोवधायैव न केवलं विभोः ॥ कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सी
ताकृतानि व्यसनानीश्वरस्य ॥५॥ न वै स आत्मात्मवतां सुहृत्तमः स
क्तस्त्रिलोक्यां भगवान् वासुदेव ॥ न स्त्रीकृतं कश्मलमश्नुवीत न ल
क्ष्मणं चापि विहातुमर्हसि ॥६॥ न जन्म नूनं महतो न सौभगं न वाक्
न बुद्धिर्नाकृतिस्तोषहेतुः ॥ तैर्यद्विसृष्टानपि नो वनौकसश्च
कार सख्ये बत लक्ष्मणाग्रजः ॥७॥ सुरोऽसुरो वाप्यथ वानरो नरः सर्वा

त्मनायःसुकृतज्ञमुत्तमं ॥भजेतरामंमनुजाकृतिंहरिंयउत्तराननय
त्कोशलानूदिवमिति ॥८॥भारतेपिवर्षेभगवान्नरनारायणाख्य
आकल्पांतमुपचितधर्म्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभ
नमनुग्रहायात्मवतामनुकंपयातपोव्यक्तगतिश्चरति ॥९॥तंभग
वान्नारदोवर्णाश्रमवतीभिःप्रजाभिर्भगवत्प्रोक्ताभ्यांसांख्ययोगा
भ्यांभगवदनुभावोपवर्णंरूपदेक्ष्यमाणःपरमभक्तिभावेनोपस
रतिइदंचाभिगृणाति ॥१०॥ ॐनमोभगवतेउपशमशीलायो
परतानात्म्यायनमोऽकिंचनवित्तायऋषिऋषभायनरनाराय
णायपरमहंसपरमगुरवेआत्मारामाधिपतयेनमोसकृविवि

नमइतिगायतिचेदं कर्त्तास्यसर्गादिषुयोनवध्यते नहन्यतेदेहगतोपि
दैहिकैः द्रष्टुर्नदृग्यस्यगुणैर्विदूष्यतेतस्मैनमोसक्तविविक्तसाक्षिणे॥
११॥इदंहियोगेश्वरयोगनैपुणंहिरण्यगर्भोभगवान्जगादयत्॥
यदंतकालेत्वयिनिर्गुणेमनोभक्त्यादधीतोज्झितदुःकलेवरः॥१२॥
यथेहिकामुष्मिककामलंपटः सुतेषुदारेषुधनेषुचिंतयन्॥शंके
तविद्वान्कुकलेवरात्ययात्यस्तस्यपन्नः श्रमएवकेवलं॥१४॥तन्न
प्रभोत्वंकुकलेवरार्पितांत्वन्मायायाहंममतामधोक्षजं॥भिंद्यामयेना
शुवयंसुदुर्भिदांविधेहियोगंत्वयिनःस्वभावमिति॥१५॥भारतेप्यऽस्मि
न्वर्षेसरिच्छैलाः संतिहिचहवः मगलप्रस्थोमैनाकस्त्रिकूटऋषभःकूट

घ्राणसमलंकृ वंतदधिकरुणा आत्मनो [illegible] पतंतियत्र हविनग्नग्रहंपापपुरुषं
धर्मराजपुरु[illegible]यंकइव सर्वतोंगेषुसूत्रैःपरिवयंति एवंविधानर
कायमालयेसंति शतसःसहस्रशस्तेषुसर्वेषुच सर्वएवाधर्मव
र्त्तिनोयेकेचिदिहोदिता अनुदिताश्चाऽवनिपते पर्यायेणविशं
तितथेवधर्मनुवर्तिनइतरत्र इहतुपुनर्भवेतउभयशेषाभ्यांनि
विशंति निवृत्तिलक्षण मार्ग आदावेवव्याख्यात एतावाने
वांडकोशोयश्चतुर्द्दशधापुराणेषुविकल्पितउपगीयतेयत्त
द्भगवतोनारायणस्यसाक्षान्महापुरुषस्यस्थविष्ठंरूपमात्ममाया

नमइतिगायतिचेदं कर्त्तास्यसर्गादिषुयोनवध्यते नहन्यते देहगतोपि
दैहिकैः द्रष्टुर्नदृग्यस्यगुणैर्विदूष्यते तस्मैनमोसक्तविविक्तसाक्षिणे॥
१२॥ इदंहियोगेश्वरयोगनैपुणं हिरण्यगर्भोभगवान्जगादयत्॥
यदंतकालेत्वयिनिर्गुणेमनोभक्त्यादधीतोज्झितदुःकलेवरः॥१३॥
यथैहिकामुष्मिककामलंपटः सुतेषुदारेषुधनेषुचिंतयन्॥ शंके
तविद्वान्कुकलेवरात्ययात्यस्तस्ययत्नः श्रमएवकेवलं॥१४॥ तन्नः
प्रभोत्वंकुकलेवरार्पितां त्वन्माययाहंममतामधोक्षजं॥ भिंद्यामयेना
शुवयंसुदुर्भिदां विधेहियोगंत्वयिनःस्वभावमिति॥१५॥ भारतेप्यऽस्मि
न्वर्षेसरिच्छैलाः संतिहिबहवः मलयमंगलप्रस्थोमैनाकस्त्रिकूटऋषभः कूट

स्पणुमलं यंतदधिकरण आत्मनोन्य ... पतति अत्र हविर्नग्रहं पापपुरुषं
धर्मराजपुरु ... यंकइव सर्वतोंगे षुसूत्रैः परिवयं ति एवं विधानर
कायमालयेसंति शतसः सहस्रशास्तेषु सर्वेषु चक्षवर्णावाधर्म्मव
र्तिनो येकेचिद् दिहोदिता अनुदिताश्चाऽवनिपतेपर्यायेणाविशं
तितं वेवधर्म्मनुवर्तिन इत्यरत्र इहतु पुनर्भवेत उभयशेषाभ्यां नि
विशंति निहृतिलक्षण मार्ग आ दावेव व्याख्यात एतावाने
वांडकोशो यश्चतुर्द्दशधा पुराणेषु विकल्पित उपगीयते यत्त
द्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थाविष्ठं रूपमात्ममाया

श्रीभा०पं०
९२

गुणमयमनुवर्णितमादृतःपठतिशृणोतिश्रावयतिसउपगे
यंभगवतःपरमात्मनोग्राह्यमपिश्रद्धाभक्तिविशुद्धबुद्धिर्वेद॥
२९॥श्रुत्वास्थूलंयथासूक्ष्मंरूपेभगवतोमतिः स्थूलेनिर्जित
मात्मानंशनैःसूक्ष्मंनिधारयेदिति॥३०॥भूद्वीपवर्षसरिदद्रिन
भःसमुद्रपातालदिङ्नरकभागणलोकसंस्थागीतामयातवनृपा
द्भुतमीश्वरस्यस्थूलंवपुःसकलजीवनिकायधाम॥३१॥इति
श्रीमद्भागवतेमहापुराणेपंचमस्कंधेषड्विंशोध्यायः॥२६॥ ॥
मंगलंलेखकानांचपाठकानांचमंगलंमंगलंसर्वलोकानांभूमेभूप
तेमंगलं॥ [illegible] २३श्रावणसत्कपक्षे७रविवासरे

तदप्रत्याम्नातवंतदधिकरण आत्मनोन्यस्मादसतोपिपराभवमन्वीक्षमाणः॥
॥६॥ अथहभगवानादिदेवएतस्यगुणविसर्गस्यपरिबृंहणानुध्यानव्यवसि
तसकलजगदभिप्रायआत्मयोनिखिलनिगमनिजगणपरिवेष्टितःस्वभव
नादवततार॥७॥सतत्रतत्रगगनतलउडुपतिरिवविमानावलिभिरनुपथ
ममरपरिबृढैरभिःपूज्यमानःपथिपथिवरूथशःसिद्धगंधर्वसाध्यचारणमुनिग
णैरुपगीयमानोगंधमादनद्रोणीमवभासयन्नुपससर्प॥८॥तत्रहवाएनंदे
वर्षिर्हंसयानेनागतंपितरंभगवंतंहिरण्यगर्भमुपलभमानःसहसैवोत्थायार्हणे
नसहपित्राभ्यामवहितांजलिरुपतस्थे॥९॥भगवानपिभारततदुपनीता
र्हणःसूक्तवाकेनातितरामुदितगुणगणावतारसुजयः॥प्रियव्रतमादिपुरुषस्तं
सदयहासावलोकइतिहोवाच॥१०॥श्रीभगवानुवाच॥निबोधताततेदमृतंब्र

श्रीभा० पं०
२

वीमिमासूयितुंदेवमर्हस्यप्रमेयं॥वयंभवस्तेततएषमहर्षिर्वहामसर्वेविवशायस्य
दिष्टं॥११॥नतस्यकश्चित्तपसाविद्ययावानयोगवीर्येणमनीषयावा॥नैवार्थध
र्मैःपरतःस्वतोवाकृतंविहंतुंतनुभृद्विभूयात्॥१२॥भवायनाशायचकर्मक
र्तुंशोकायमोहायसदाभयाय॥सुखायदुःखायचदेहयोगमव्यक्तदिष्टंजन
तांगधत्ते॥१३॥यद्वाचितंत्यांगुणकर्मदामभिःसुदुस्तरैर्वत्सवयंसुयोजि
ताः॥सर्वेवहामोवलिमीश्वरायप्रोतानसीवद्विपदेचतुष्पदः॥१४॥ईशाभि
सृष्टंह्यवरुंध्महेंगदुःखंसुखंवागुणकर्मसंगात्॥आस्थायतत्तद्यदयुंक्तना
थश्चक्षुष्मतांधाइवनीयमानाः॥१५॥मुक्तोपितावद्बिभृयात्स्वदेहमारब्धम
श्नन्नभिमानशून्यः॥यथानुभूतंप्रतियातनिद्रःकिंत्वन्यदेहायगुणान्नवृंक्ते॥
१६॥भयंप्रमत्तस्यवनेष्वपिस्याद्यतःसआस्तेसहषट्सपत्नः॥जितेंद्रियस्या

राम०
२

त्मरतेर्वुधस्य गृहाश्रमः किंनु करोत्यवद्यं ॥१७॥ यः षट् सपत्नान्विजिगीषमाणो
गृहेषु निर्विश्य यतेत पूर्वं ॥ अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विच
रेद्विपश्चि ॥१८॥ त्वंत्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ॥
भुंक्ष्वेह भोगान्पुरुषातिदिष्टान् विमुक्तसंगः प्रकृतिं भजस्व ॥१९॥ श्रीशुक उ० ॥
इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनं ॥ मात्मनो लघु
तयाऽवनतशिरोधरो वाढमिति सबहुमानमुवाह ॥२०॥ भगवानपि मनुना यथाव
दुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थान
मवाङ्मनसं क्षयमव्यवहृतं प्रवर्त्तयन्नगमत् ॥२१॥ मनुरपि परेणैवं प्रतिसंधितम
नोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तय आस्थाप्य स्वयम
तिविषयजलाशयाशाया उपरराम ॥२२॥ इति ह वाव जगतीपतिरीश्वरेच्छयाधिनि
वेशितकर्माधिकारोऽखिलजगद्बंधध्वंसनपरानुभावस्य भगवत आदिपुरुषस्यां

ध्रियुगलेनानवरतध्यानानुभावेनपरिरंधितकषायाशयोवदातोपिमानवर्द्धनोमहतां
महीतलमनुशशास॥२३॥अथदुहितरंप्रजापतेर्विश्वकर्मणउपयमेवर्हिष्मतींनाम
तस्यामुहवावआत्मसमानशीलगुणकर्मरूपवीर्योदारान्दशभावयांवभूवकन्यां
चयवीयसीमूर्जस्वतींनाम॥२४॥आग्नीध्रोऽध्मजिह्वयज्ञवाहुमहावीरहिरण्यरे
तोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवयः इतिसर्वएवाग्निनामानः एतेषां
कविर्महावीरःसवनइतित्रयआसन्नूर्द्ध्वरेतसः॥२५॥तआत्मविद्यायामर्भभावादा
रभ्यकृतपरिचयाःपारमहंस्यमेवाश्रममभजन्॥२६॥तस्मिन्नुहवाउपशमशीलाः
परमर्षयःसकलजीवनिकायावासस्यभगवतोवासुदेवस्यभीतानांशरणभू
तस्यश्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन
परिभावितान्तर्हृदयाधिगतेभगवतिसर्वेषांभूतानामात्मभूतेप्रत्यगात्मनोवा

त्मनस्तादात्म्यमविशेषेणसमीयुः॥२७॥अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्त
मस्तामसोरैवत इति मन्वंतराधिपतयः॥२८॥एवमुपशमायनेषु स्वतनयेष्वऽ
थ जगतीपतिर्जगतीमर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषका
रसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो
बर्हिष्मत्याअनुदिनमेधमानप्रमोदप्रसरणयोषण्यव्रीडीप्रमुषितहासावलो
कसचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभु
जे॥२९॥यावदवभासयति सुरगिरिमनुपरिक्रमन्भगवानादित्यो वसुधातलम
र्द्धेनैव प्रतपत्यर्द्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपूरुषप्रभाव
स्तदनभिनंदन्समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृ
त्वस्तरणिमनुपर्यक्रामद्द्वितीइव पतंगः॥३०॥ये वा उ ह रथचरणनेमिकृतपरिखा

श्रीभा० पं०
५

तास्तेसप्तसप्तसिंधवआसन् यतएवकृताःसप्तभुवोद्वीपाः जंबूप्लक्षशाल्मलिःकुशक्रौं
चशाकपुष्करसंज्ञाः तेषांपरिमाणंपूर्वस्मादुत्तरोत्तरयथासंख्यंद्विगुणमानेनवहिः
समंततउपक्लृप्ताः॥३१॥क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोदशुद्धोदाः
सप्तजलधयःसप्तद्वीपपरिखाइवाभ्यंतरद्वीपसमानाएकैकशोयथानुपूर्वंसप्तस्व
पिवहिर्द्वीपेषुपृथक्परितउपकल्पिताः तेषुजंब्वादिषुवर्हिष्मतीपतिरनु
व्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथि
वीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकमेकमेवाधिपतिंविदधेदुहितरंचो
र्जस्वतींनामोशनसेप्रायच्छद्यस्यामासीद्देवयानीनामकाव्यसुता॥३२॥नैवंवि
धःपुरुषकारउरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणानां चित्रंविदूरवि
गतःसकृदाददीतयन्नामधेयमधुनासजहातिवंधः॥३३॥सएवमपरिमितव

हरे०
५

लपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवा
त्मानंमन्यमानआत्मनिर्वेदइदमाह अहोअसाध्वनुष्ठितंयदभिनिवेशितोऽह
मिंद्रियैरविद्यारचितविषयांधकूपेतदलममुष्यावनितायाविनोदमृगंमांधिग्धि
गितिगर्हयांचकार ॥३४॥ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यःपु
त्रेभ्यइमांयथादायंविभज्यभुक्तभोगांचमहिषींमृतकमिवसहमहाविभूतिमपहा
यस्वयंनिहितनिर्वेदोहृदिगृहीतहरिविहारानुभावोभगवतोनारदस्यपदवींपुन
रेवानुससार ॥३५॥ तस्यहवाएतेश्लोकाः प्रियव्रतकृतंकर्मकोनकुर्याद्विनेश्वरंयोनेमि
निम्नैरकरोत्छायांघ्नन्सप्तवारिधीन् ॥३६॥ भूसंस्थानंकृतंयेनसरिद्गिरिवनादिभिः
सीमाचभूतनिर्वृत्यैद्वीपेद्वीपेविभागशः ॥३७॥ भौमंदिव्यंमानुषंचमहित्वंकर्मयोगजं ॥
यश्चक्रेनिरयौपम्यंपुरुषानुजनप्रियः ॥३८॥ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेवर्ष

श्रीभा०स्कं० ५

प्रियव्रतविजयेनाम प्रथमध्यायः॥१॥द्वितीयेप्रोक्तमाग्नीध्रचरितंस्वैणसमतं॥पश्चांहिपूर्व
चित्तंयोनाभिमुख्यान्जीजनत्॥१॥ ॥श्रीशुकउवाच॥एवंपितरिसंप्रवृत्तेतदनुशासने
वर्तमानआग्नीध्रोजंबूद्वीपौकसः॥प्रजाऔरसवद्धर्मावेक्षमाणःपर्यगोपायत्॥१॥
सकदाचित्पितृलोककामःसुरवरवनिताक्रीडाचलद्रोण्यांभगवंतंविश्वसृ
जांपतिमाभृतपरिचर्योपकरण॥२॥आत्मैकाग्र्येणतपस्वीआराधयांबभूव॥
तदुपलभ्यभगवानादिपुरुषःसदसिगायंतीपूर्वचित्तिंनामाप्सरसमभियापयामा
स॥३॥साचतदाश्रमोपवनमतिरमणीयंविविधनिबिडविटपिविटपनिकरपुर
टलतारूढस्थलविहंगममिथुनैःप्रोच्यमानश्रुतिभिःप्रतिबोध्यमानसलिलकुक्कु
टकारंडवकहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्रामः॥
४॥तस्याःसुललितगमनपदविन्यासगतिविलासायाश्चानुपदंखणखणमानरुचिरच

हरि० ५

रणाभरणस्वमुपाकर्णय नरदेवकुमारः॥ समाधियोगेनामीलितनयननलिन
मुकुलयुगलमीषद्विकचय्यव्यचष्ट॥५॥ तामेवाविदूरे मधुकरीमिव सुमन
सउपजिघ्रंतीं दिविजमनोनयनाह्लादद्रुतवेगतिविहारविनयावलोकसु
स्वरात्तराववयवैर्नन सिन्नणां कुसुकुसुमायुधस्य विरधतीं विवरं॥६॥ निज
मुखगलिताम्रतासवसहासभाषणामोदमदांधमधुकरनिकरोपरोधेन द्रुत
पदविन्यासेन वल्गुस्पंदनस्तनकलशाकवरभाररसनां देवीं तदवलोकनेन वि
हृतावसरस्य भगवतोमकरध्वजस्य वशमुनीतो जडवदिति होवाच॥७॥ कात्वं
चिकीर्षसि च किं मुनिवर्य शैले मायाऽसि कापि भगवत्परदेवतायाः॥ विज्येवि
भ्रौधनुषि सुहृदात्मनोर्थे किं वा मृगान्मृगयसे विपिने प्रमत्तान्॥८॥ बाणा
विमौ भगवतः शतपत्रपत्रौ शांतावपुंखरुचिरावतिग्मदंतौ॥ कस्मै युयुंक्षसि

वने विचरन्न विघ्नः स्तेमायनो जडधियां तव विक्रमोस्तु ॥९॥ शिष्यादिमे भ[illegible] वनः परितः पठंति गायंति सामसरहस्यमजस्रमीशा ॥ युष्मात्स्थिर विलुलिताः सुमनोभिवृष्टीः सर्वे भजंत्यृषिगणा इव वेदशाखा ॥१०॥ वाचं परं चरणपंकजांतिं त्रिरीणां व्रह्मन्नरूपमुखरां श्रुणुवाम तुभ्यं ॥ लब्धा करं व रुचिरं कविटंकविं वेयस्यामलानपरिधिः क्व च वल्कलं ते ॥११॥ किं संभ्रमं रुचिरयोर्द्विजश्रृंगयोस्ते मध्ये हृशो वहसि पत्रहृशिष्यितामेपंकोरुणः सुरभिराम्म विखाणईदृकृयेनाश्रमं च सुभगे सुरभीकरोषि ॥१२॥ लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ॥ अस्मद्विधस्य मनउयत्त्वनोविभर्त्ति वल्गु नं सरसरासस्सुधादिवक्त्रे ॥१३॥ का वात्महृत्तिरदनाद्धविरंगवाति विष्णोः कलास्यनिमिषोन्मकरोच कर्णौ ॥ उद्विग्नमीनयुगलं द्विजपंक्तिशाचिरासन्नभृंग

निकरंसरसनमुखंबते॥१४॥योसौत्वयाकरसरोजहतःपतंगोदिक्षुभ्रमन्भ्रमतएजयेते

ऽस्त्रिणीमिमुतंननते स्मरसिवक्रजरावरू..छंकष्टंनिलोहरतिलंपटाराषनीवी॥

१५॥तरूपंतपोधनतपश्चरतांघ्नेयतन्तुकेनतपसाभवतोलब्धं॥चेत्रंतपोह

सिमयासहमित्रमहोंकिंवाप्रसीरतिसवैभवभावनोमे॥१६॥नत्वांतजामिर

यितद्विजदेवदत्तंयस्मिन्मनोदृगपिनोनवियातिलग्नं॥मांचारूशृंगघर्हसिनेः

तुमनुव्रतेचिंयतःप्रतिसरंतुशिवाःसविधः॥१७॥इतिललनानुयातिविशारदो

ग्राम्यवैदग्ध्ययापरिभाषयतिविधवंधुंविबुधिमतिसतोजयामास॥१८॥सा

चनतस्तस्पवीरयूथपतेर्बुधीशीलरूपवयः॥श्रियौदार्येणपराह्निप्तमनास्ते

नसहायुतायुतपरिवत्सरोपलक्षणंकालंजंबूद्वीपपतिनाभोस्वर्गभोगान्

वुभुजे॥१९॥तस्यामुहवाआग्नजासराजवरआग्नीध्रोनाभिकिंपुरुषहरिवर्ष

श्रीभा॰पं॰
७

लावृतं रम्यकं हिरण्मयं कुरुं भद्राश्वं केतुमालमिति संज्ञान्नव पुत्रानजनयत्॥ सा सूत्वा

थ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे॥२०॥

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः॥ पित्रा विभक्ता आ

त्मतुल्यनामानि यथाभागं जंबूद्वीपवर्षाणि बुभुजुः॥२१॥ आग्नीध्रो राजातृप्त

कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवरुंध

यत्र पितरो मादयंते॥२२॥ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्र

तिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देवीतिमितिसंज्ञा नवोदवहन्॥

इति श्रीमद्भागवते महापुराणे पंचमस्कंधे आग्नीध्रवर्णनं नाम द्वितीयोध्यायः॥२॥

तृतीये चरितं नाभेः परं मंगलमीर्यते यस्य यज्ञे प्रतीतः सत्पुत्रोऽभूद्वृषभो हरिः॥१॥

॥ ॥श्रीशुक उवाच॥ नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमव हि

राम॰
७

तात्माऽयजत्॥१॥तस्यहवावश्रद्धयाविशुद्धभावेनयजतःप्रवर्ग्येषुप्रचर
त्सुद्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्यादुरधिगमोपि
भगवान्भागवतवात्सल्यतयासुप्रतीकआत्मानमपराजितंनिजजनाभि
प्रेतार्थविधित्सयागृहीतहृदयोहृदयंगमंमनोनयनानंदनावयवाभिराममा
विश्चकार॥२॥अथहतमाविष्कृतभुजयुगलद्वयंहिरण्मयंपुरुषविशेषं
कपिशकौशेयांवरधरमुरसिविलसच्छ्रीवत्सललामंदरवरवनरुहवन
मालाछूर्यमृतमणिगदादिभिरुपलक्षितं॥३॥स्फुटकिरणप्रवरमलिय
मुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुरांगभूषणविभूषितमृत्वि
क्सदस्यगृहपतयोऽधनाइवोत्तमधनमुपलभ्यसबहुमानमर्हणे
नावनतशीर्षाणउपतस्थुः॥४॥अहसिमुहुरर्हत्तमार्हणमस्माकमनुप

श्रीभा० पं०
९

याणां नमो नम इत्येतावदुपशिक्षितं कोऽर्हति युगानूनप्रकृत्तिगुणव्यतिक
रमतिवनीशाईश्वरस्य प्रकृतिपुरुषयोरर्वाक्तननाभिनामरूपाकृतिभी रूप
निरूपणं ॥५॥ सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैक
देशकथनादृते ॥६॥ परिजानानुरागविरचितशबलसंशब्दसलिलसित
किसलयतुलसिदुर्वांकुरैरपि संभृतया सपर्यया किल परम परितुष्यसि
॥७॥ अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभा
महे ॥८॥ आत्मन एवानुसवनमंजसाव्यतिरेकेण वोभूयमानाशेषपुरुषा
र्थस्वरूपस्य किंतु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुम
र्हति ॥९॥ तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपुरुष
प्रकर्षकरुणया त्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एव

स्क०
९

वेतखदिहोपलक्षितः ॥१०॥ आपायमेववरोह्यर्हत्तमयर्हिवर्हिषिराजर्षेवरद
र्भोभवान्निजापुरुषेक्षणविषयआसीत् ॥११॥ असंगनिशितज्ञानावलविधु
ताशेषमलानांभवत्स्वभावानामात्मारामाणांमुनीनामनवरतपरिगुणित
गुणगणपरममंगलायनगुणकथनोसि ॥१२॥ अथ[illegible]थंचित्स्खलनक्षुत
पतनजंभणदुःखस्थानादिषुविवशानांनःस्मरणायज्वरमणदशाया
मपिसक[illegible]लकश्मलनिरसनानितवगुणकृतनामधेयानिवचनगोचराणि
भवंतु ॥१३॥ किंचायंराजर्षिरपत्यकामःप्रजांभवादृशीमाशासनईश्वरमा
शिषांस्वर्गापवर्गयोरपिभगवंतमुपधावति प्रजायामर्थप्रत्ययोधनमिव
धनःफलीकरणं ॥१४॥ कोवाइहतेपराजितयामायया ऽनवसितपदव्या
ऽपराजितोनावृतमतिर्विषयानावृतप्रकृतिरनुपासितमहच्चरण ॥१५॥ य

दुहवावतवपुनरदभ्रकर्तरिहसमाहूतस्तदर्थधियांमंदानांनस्तद्यद्देवहेल
नंदेवार्हसिसाम्येनसर्वान्प्रतिवोढुमविदुषां॥१६॥इतिनिगदेनाभिष्टूय
मानोभगवाननिमिषर्षभोवर्षधराभिवादिताभिवंदितचरणःसदयमि
दमाह॥१७॥श्रीभगवानुवाच॥अहोबताहमृषयोभवद्भिरवितथगीर्भि
र्वरमसुलभमभियाचितोय [illegible] दमुष्यात्मजोमयासदृशोभू
यादितिममाहमेवाभिरूपःकैवल्यादथापिब्रह्मवादोनमृषाभवितु
मर्हतिममैवहिमुखंयद्द्विजदेवकुलं॥१८॥ततआग्नीध्रीयेंऽशकल
यावतरिष्याम्यात्मतुल्यमनुपलभमानः॥इतिनिशामयंत्यामेरुदेव्याःप
तिमभिधायांतर्दधेभगवान्॥१९॥बर्हिषितस्मिन्नेवविष्णुदत्तभगवान्
परमर्षिभिःप्रसादितोनाभेःप्रियचिकीर्षयातदवरोधायनेमेरुदेव्यांध

मान्दर्शयितु॥कामोवातरशनानांश्रमणानाम्ऋषीणाम्ऊर्द्ध्वमंथिनांशुक्ला
यातनुवावततार॥२०॥इतिश्रीभगवतेमहापुराणेपंचमस्कंधेतृतीयोध्या
यः॥३॥चतुर्थीदित्रिभिःप्रोक्तंऋषभस्याहितंमहत्लोकार्थंयेनसत्कर्मनै
ष्कर्म्यंचविनिर्दिशेत्॥१॥चतुर्थेशतपुत्रस्यराज्यंतस्यापवर्ण्यतेयस्यराज्ये
जनःसर्वःसंतोषाम्ततनिर्वृतः॥२॥ ॥श्रीशुकउवाच॥अथहतमुत्पत्त्यैवा
भिव्यजमानभगवल्लक्षणंसाम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनु
दिनमेधमानानुभावंप्रकृतयःप्रजाब्राह्मणादेवताश्चावनितलसमवना
यातितरांजगृधुः॥१॥तस्यहवाइत्थंवर्ष्मणावरीयसाबृहच्छ्लोकेनचौजसा
बलेनश्रियायशसावीर्यशौर्याभ्यांचपिताऋषभइतीदंनामचकार॥२॥
यस्यहीद्रःस्पर्द्धमानोभगवा[illegible]र्षेतदवधार्यभगवान्ऋषभदेवोयोगेश्वरः॥

श्रीभा० पं० १०

प्रहस्यात्मयोगमाययास्ववर्षमजनाभंनामभ्यवर्षत्॥३॥नाभिस्तुयथाभिलषितंसु
प्रजास्त्वमवरुध्याऽतिप्रमोदभरविह्वलोगद्गदाक्षरयागिरास्वैरंगृहीतनरलो
कधर्मंभगवंतंपुराणंमायाविलसितमतिर्वत्सतातेतिसानुरागमुपलालय
न्परंनिर्वृतिमुपगतोविदितानुमापौरप्रकृतिजनपदोराजानाभिरात्मजंसम
यसेतुरक्षायामभिषिच्यब्राह्मणेषूपनिधायसहमेरुदेव्याविशालायांप्रसन्न
निपुणेनतपसासमाधियोगेनेनरनारायणाख्यंभगवंतंवासुदेवमुपासीनःका
लेनतन्महिमानमवाप॥४॥यस्यहपांडवेयश्लोकावुदाहरंतिकोनुतत्कर्मराजर्षे
र्नाभेरन्वाचरेअपत्यतामगाद्यस्यहरिःशुद्धेनकर्मणा॥५॥ब्रह्मण्योन्यःकुतोना
भेर्विप्रामंगलपूजिताः॥यस्यबर्हिषियज्ञेशंदर्शयामासुरोजसा॥६॥अथहभ
गवानृषभदेवःस्ववर्षंकर्मक्षेत्रमनुमन्यमानःप्रदर्शितगुरुकुलवासोऽवल
ब्धवरैर्गुरुभिरनुज्ञातोगृहमेधिनांधर्माननुशिक्षमाणोजयंत्यामिंद्रदत्तायामु

राम०
१

भयलक्षणं कर्मसमाम्नायाम्नातमभियुंयन्नात्मजानामात्मसमानानांशतंज
नयामास॥७॥येषांखलुमहायोगीभरतोज्येष्ठःश्रेष्ठगुणआसीत्॥येनेदंवर्षं
भारतमितिव्यपदिशंति॥८॥तमनुकुशावर्तइलावर्तोमलयकेतुर्भद्रसेन
इंद्रस्पृक्विदर्भकीकटइतिनवनवतिप्रधानाः॥९॥कविर्हरिरंतरिक्षःप्रबुद्ध
पिप्पलायनः॥आविर्होत्रोथद्रमिलश्चमसःकरभाजन॥१०॥इतिभागवतधर्मद
र्शीनानवमहाभागवतास्तेषांसुचरितंभगवन्महिमोपबृंहितं॥वसुदेवनार
दसंवादमुपशमायनमुपरिष्टद्वर्णयिष्यामः॥११॥यवीयांसएकाशीतिर्जा
यंतेयाःपितुरादेशकरामहाशालीनामहाश्रोत्रियायज्ञशीलाकर्मविशुद्धाब्राह्म
णाबभूवु॥१२॥भगवानृषभसंज्ञआत्मतंत्रःस्वयंनित्यनिवृत्तानर्थपरंपरः॥के
वलानंदानुभवईश्वरएवविपरीतवत्कर्माण्यारंभमाणःकालेनानुगतंधर्मा
चरणेनोपशिक्षयन्नतद्विदांसमउपशांतोमैत्रःकारुणिकोधर्मार्थयशःप्रजा

नंदाम तावरोधेनगृहेषु लोकं नियमयत् ॥१३॥ यद्यच्छीर्षण्याचरितं तत्तदनुव
र्त्तते लोकः यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सा
मादिभिरुपायैर्जनतामनुशशास ॥१४॥ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्दे
शोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥१५॥ भगवतर्षभेण परि
रक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमिवात्मनोऽन्यस्मात्क
थंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृंभितस्नेहातिशयमंतरेण ॥१६॥
स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्र
जानां निशामयंतीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयंत्रिता
नप्युपशिक्षयन्निति होवाच ॥१७॥ इति श्रीभागवते महा० पंचमस्कंधे ऋषभदे
वानुवर्णनाम चतुर्थोध्याय ॥४॥ पंचमे मोक्षधर्मोपदेशेः पुत्रानुशासनं ॥ उक्तं परम
हंसं च तस्यैदृढतितिक्षया ॥१॥ ॥ ऋषभ उवाच ॥ नायं देहो देहभाजां नृलोके

कष्टान्कामान्नार्हते विड्भुजां ये ॥ तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्म
सौख्यं त्वनंतं ॥१॥ महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं ॥ म
हांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये ॥२॥ ये वा मयीशे कृत
सौहृदार्था जनेषु देहंभरवार्तिकेषु ॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता
यावदर्थाश्च लोके ॥३॥ नूनं प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आपृणो
ति न साधु मन्ये यत आत्मनोयमसन्नपि क्लेशद आस देहः ॥४॥ पराभवस्ताव
बोधजातो यावन्न जिज्ञासत आत्मतत्त्वं ॥ यावत्क्रियास्तावदिदं मनो वै कर्मात्म
कं येन शरीरबंधः ॥५॥ एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने ॥
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥६॥ यदा न पश्यत्ययथा
गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ॥ गतस्मृतिर्विंदति तत्र तापानासाद्य

भा०पं०
१२

मैथुन्यमगारमज्ञः ॥७॥ पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः ॥ अ
तो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ॥८॥ यदा मनोहृदयग्रंथिरस्य क
र्मानुबद्धो दृढ आश्लथेत ॥ तदा जनः संपरिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुं ॥
९॥ हंसे गुरौ मयि भक्त्याऽनुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च ॥ सर्वत्र जंतोर्व्य
सनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥१०॥ मत्कर्मभिर्मत्कथया च नित्यं मद्देव
संगाद्गुणकीर्तनान्मे ॥ निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः
॥११॥ अध्यात्मयोगेन विविक्तसेवया प्राणेंद्रियात्माभिजयेन सध्र्यक् ॥ सच्छ्रद्ध
या ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचं ॥१२॥ सर्वत्र मद्भावविचक्षणेन ज्ञाने
न विज्ञानविराजितेन ॥ योगेन धृत्युद्यमसत्त्वयुक्तो लिंगं व्यपोहेत्कुशलोऽहमाख्यं
१३॥ कर्माशयं हृदयग्रंथिबंधमविद्ययासादितमप्रमत्त ॥ अनेन योगेन यथोपदेशं

राम०
१२

सम्यग्भपोह्यपरमेतत्योगत् ॥२४॥ पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोकका
मो मदनुग्रहार्थी ॥ इत्थं विमन्युरनुशिष्यातद ज्ञान्नयोजयत्कर्मसु कर्ममूढा
न् ॥२५॥ लोकः स्वयं श्रेयसि नष्टदृष्टिर्योर्थान्समीहेत निकामकामः ॥ अन्योन्य
वैरः सुखलेशहेतोरनंतदुःखं च न वेद मूढः ॥२६॥ कस्तं स्वयं तदभिज्ञो विप
श्चिदविद्यायामंतरे वर्तमानं ॥ दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथ
गं यथांधं ॥२७॥ गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ॥
~~दृष्ट्वा पुनस्तं सघृणः कु~~ दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युं ॥१
८॥ इदं शरीरं मम दुर्विभाव्यं तत्वं हि मे हृदयं यत्र धर्मः ॥ पृष्ठे कृतो मे यदधर्म आ
राद्तो हि मामृषभं प्राहुरार्याः ॥१९॥ तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसम
सुनाभं ॥ अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानां ॥२०॥ भूतेषु वीरु

श्रीभा०पं०
९१

द्भ्यउदुत्तमायेसरीसृपास्तेषुसबोधनिष्ठाः॥ततोमनुष्याःप्रमथास्ततोपिगंध
र्वसिद्धाविबुधानुगाये॥२१॥देवासुरेभ्योमघवत्प्रधानादक्षादयोब्रह्मसुत
स्तुतेषां॥भवःपरःसोथविरिंचवीर्यःसमत्परोद्विजदेवदेवः॥२२॥नब्राह्म
णैस्तुलयेभूतमन्यत्पश्यामिविप्राःकिमतःपरंच॥यस्मिन्नृभिःप्रहुतंश्रद्ध
याहमश्नामिकामंनतथाग्निहोत्रे॥२३॥धृतातनूरुशतीमेपुराणीयेनेहस
त्वंपरमंपवित्रं॥शमोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र॥२४॥
मत्तोप्यनंतात्परतःपरस्मात्स्वर्गाधिपतेनकिंचित्॥येषांकिमुस्यादित
रेणतेषामकिंचनानांमयिभक्तिभाजां॥२५॥सर्वाणिमद्धिष्ण्यतयाभवद्भि
श्चराणिभूतानिसुताध्रुवाणि॥संभावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदु
हार्हणंमे॥२६॥मनोवचोदृक्करणेहितस्यसाक्षात्कृतंमेपरिबर्हणंहि॥किना

राम०
९१

पुमान्येनमहाविमोहात्कृतांतपाशान्नविमोक्तुमीशेत् ॥२७॥ श्रीशुकउवा
च ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपिलोकानुशासनार्थंमहानुभा
वः परसुहृत्भगवानृषभापदेशउपशमशीलानामुपरतकर्मणांम
हामुनीनांभक्तिज्ञानवैराग्यलक्षणंपारमहंस्यधर्ममुपशिक्षमाणः स्वत
नयंशतज्येष्ठंपरमभागवतंधरणिपालनायाभिषिच्यस्वयंभवनएवोर्व
रितशरीरमात्रपरिग्रहउन्मत्तइवगगनपरिधानः ॥ प्रकीर्णकेशआत्म
न्यारोपिताहवनीयोब्रह्मावर्त्तात्प्रवव्राज ॥२८॥ जडांधमूकबधिरपिशा
चोन्मादवद्वधूतवेषोभिभाष्यमाणोपिजनानांगृहीतमौनव्रतस्तूष्णींब
भूव ॥२९॥ तत्रतत्रपुरग्रामाकरखेटवाटशिविरव्रजघोषसार्थगिरिवनाऽ
श्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानोमक्षिकाभिरिववनगज

तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदवि
गणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदे सदपदेश उभया
नुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वाद
विखंडितमना: पृथिवीमेकचरः परिवभ्राव:॥३०॥ अतिसुकुमारकरच
रणोरःस्थलविपुलबाह्ववयवविन्यासः प्रकृतिसुंदरस्वभावहाससुमुखो न
वनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगक
पोलकर्णकंठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि
कुसुमशरासनमुपदधानः परागवलवमानकुटिलकपिशकेशभूरिभारो
ऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत॥३१॥ यर्हि वाव स भ
गवांल्लोकमिदं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सि

ततमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेव हति हद
ति स्म चेष्टमान उच्चरित आदिग्धोद्देशः॥३२॥ तस्य ह यः पुरीषसुरभिसौगंध्य
वायुस्तं देशं योजनं समाताः सुरभिं चकार॥३३॥ एवं गोमृगकाकचर्यया व्रजे
स्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म॥
३४॥ इति नानायोगचर्याचरणो भगवान् कैवल्यपतिरृषभोऽविरतप
रममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आ
त्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वै
हायसमनोजवांतर्द्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि
नांजसा नृप हृदयेनाभ्यनंदत्॥३५॥ इति श्रीभागवते महापुराणे पंचमस्कंधे
षष्टे लीनाभिमानस्य देहत्यागक्रमाभिधा॥ प्रवदंतं
मे संवादे पंचमोऽध्यायः॥५॥

दवाग्निर्यःपरस्प नपिनपश्यति॥१९॥ ॥ननूनंभगवत आत्मारामाणांयोगसमीरित॥ज्ञा
नावभर्जितकर्मबीजानामैश्वर्याणिपुनःक्लेशदानिभवितुमर्हंतियदृच्छयोपगता
नि॥१॥ऋषभउवाच॥सत्यमुक्तंकिंत्विहवाएकेनमनसोद्धाविश्रंभमनवस्थानस्यशठ
किरातइवसंगच्छते॥२॥तथाचोक्तं॥नकुर्यात्कर्हिचित्सख्यंमनसिह्यनवस्थितेयद्वि
श्रंभाच्चिराच्चीर्णंचस्कंदतपऐश्वरं॥३॥नित्यंददातिकामस्यछिद्रंतमनुयेरयः॥योगि
नःकृतमैत्रस्यपत्युर्जायेवपुंश्चली॥४॥कामोमन्युर्मदोलोभःशोकमोहभयादयः॥
कर्मबंधश्चयन्मूलःस्वीकुर्यात्कोनुतद्बुधः॥५॥अथैवमखिललोकपालललामोवि
लक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावोयोगिनांसांपरा
यविधिमनुशिक्षयंस्वकलेवरंजिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतर
भावेनान्वीक्षमाणउपरतानुवृत्तिरुपरराम॥६॥तस्यहवाएवंमुक्तलिंगस्यभगवत
ऋषभस्ययोगमायावासनयादेहइमांजगतीमभिमानाभासेनसंक्रममाणः॥७॥कों

भा०पं०
१६

ष्यति ॥१२॥ प्रथममवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः तस्यानुगुणान्श्लोका
न्गायंति ॥१३॥ अहो भवः सप्तसमुद्रवत्या द्वीपेषु सर्वेषु धिपुण्यमेतत्गायंतिय
त्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवंति ॥१४॥ अहो नु वंशो यशसाऽवदातः प्रै
यव्रतो यत्र पुमानुराणः कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महे
तुं ॥१५॥ कोन्वस्य काष्ठामपरोनुगच्छेन्मनोरथेनाप्यभवस्य योगी ॥ यो योगमायाः
स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्ना ॥१६॥ इति ह स्म सकलवेदलोकदेव
ब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितं पुंसां समस्तदुश्च
रिताभिहरणं परममहामंगलायनमिदमनुश्रद्धयोपचितयानुशृण्वत्याश्रा
वयति वावहितो भगवति तस्मिन्वासुदेव एकांततो भक्तिरनयोरपि समनुवर्तते ॥
१७॥ यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुस

राम०
१६

कवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः॥ कुटकाचलोपवनआस्य
कृताश्मकवल उन्माद इव मुक्तमूर्द्धजो संवीत एव विचचार॥८॥ अथसमीरवेगविधू
तवेणुविघर्षणजातोग्रदावानलस्तद्वनमालेलिहानःसतेनददाह॥९॥ यस्यकि
लानुचरितमुपाकर्ण्यकोंकवेंककुटकानांराजार्हन्नामोपशिक्ष्यकलावधर्मउ
त्कृष्यमाणेभवितव्येनविमोहितःस्वधर्मपथमकुतोभयमपहायकुपथपाषंडम
समंजसंनिजमनीषयामंदःप्रवर्त्तयिष्यते॥१०॥ येनहवावकलौमनुजापसदादेव
मायामोहिताःस्वविधिनियोगशौचचारित्रविहीनादेवहेलनान्यपव्रतानिनिजनिजे
च्छयागृह्णानाअस्नानानाचमनाशौचकेशोवकेशोपलुंचनादीनिकलिनाधर्मबहुले
नोपहतधियोब्रह्मब्राह्मणयज्ञपुरुषलोकविदुषकाःप्रायेणभविष्यंति॥११॥ ते
चह्यर्वाक्तनयानिजलोकयात्रयोऽधपरंपरयाश्वस्तास्तमस्यंधेस्वयमेवप्रपति

वनंस्थापयंतस्तयैवंपरयानिहंत्या स्वपवर्गमात्यंतिकंपरमपुरुषार्थमपिस्वय
मेवासादितंचो एवाडियंते भगवदीयत्वेनैवपरिसमाप्तसर्वार्था॥१९॥राज
न्पतिर्गुरुरलंभवतांयदूनांदैवंप्रियः कुलपतिः क्व च किंकरोव अस्त्वेवमंग
भवान्भजतांमुकुंदोमुक्तिंददातिकर्हिचित्स्म नभक्तियोगं॥१९॥नित्यानुभूत
निजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः॥लोकस्ययः
करुणयाऽभयमात्मलोकमाख्यान्नमोभगवते ऋषभायतस्मै॥२०॥ इतिश्रीम
द्भागवतेमहापुराणेपंचमस्कंधेऋषभदेवचरितेनामषष्ठोध्यायः॥६॥ अध्याया
नांत्रयेणैवऋषभाख्यानमीरितं अष्टभिर्भरताख्यानमतःप्रस्तूयतेम्हतं॥१॥ सप्त
मेभरतोराज्येचिरंयज्ञैर्हरिंयजन्॥आरब्धकर्मनिर्वाणो हरिक्षेत्रेभजद्धरिं॥२॥
॥ ॥श्रीशुकउवाच॥भरतस्तुमहाभागवतोयदाभगवताऽवनितलपरिपाल

नायसंचिंतितः॥ तदनुशासनपरः पंचजनीं विश्वरूपदुहितरमुपयेमे॥१॥ तस्यामु
हवाआत्मजान् कार्त्स्न्येनानुरूपानात्मनः॥ पंचजनयामासभूतादिरिवभूतसू
क्ष्माणि॥२॥ सुमतिंराष्ट्रभृतंसुदर्शनमावरणंधूम्रकेतुमिति॥ अजनाभं
मेतद्वर्षंभारतमितियतआरभ्यव्यपदिशंति॥३॥ सबहुविन्महीपतिःपि
तृपितामहवदुरुवत्सलतयास्वेस्वेकर्मणिवर्तमानाःप्रजाःस्वधर्ममनुव
र्तमानः पर्यपालयत्॥४॥ ईजेचभगवंतंयज्ञक्रतुंक्रतुभिरुच्चावचैःश्रद्ध
याहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानांप्रकृतिविकृतिभि
रनुसवनंचातुर्होत्रविधिना॥५॥ संप्रचरत्सुनानायोगेषुविचरितांगक्रियाफ
लंधर्माख्यंपरेब्रह्मणियज्ञपुरुषेसर्वदेवतालिंगानांमंत्राणामर्थनियामकतयासाक्षा
त्कर्तरिपरदेवतायांभगवतिवासुदेवएवभावयमानआत्मनैपुण्यमृदित

कषायोहविष्वध्वर्युभिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवतास्तानपुरुषाव
यवेष्वभ्यध्यायत्॥६॥एवंकर्मविशुद्धिविशुद्धसत्वस्यांतर्हृदयाकाशशरीरेब्र
ह्मणिभगवतिवासुदेवेमहापुरुषरूपोपलक्षणेश्रीवत्सकौस्तुभवनमा
लादरगदादिरुपलक्षितेनिजपुरुषहृल्लिखितेनपुरुषरूपेणविरोच
मानउच्चैस्तरांभक्तिरनुदिनमेधमानरयाजायत॥७॥एवंवर्षायुतसहस्र
पर्यंतावसितकर्मनिर्वाणावसरोऽधिभुज्यमानंस्वतनयेभ्योरिक्थंपितृपै
तामहंयथादायंविभज्यस्वयंसकलसंपतिकेतात्स्वनिकेतात्पुलहाश्रमं
प्रवव्राजयत्रहवावभगवान्हरिरद्यापितत्रत्यानांनिजनानांवत्सल्येनसंनि
धाप्यतइच्छारूपेणयत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदीना
मसरित्प्रवरासर्वतःपवित्रीकरोति॥८॥तस्मिंच्चाकिलसएकलःपुलहाश्रमो

श्रीभा॰पं॰
१९

पवने।विविधकुसुमकिंशलयतुलसिकांबुभिः॥कंदमूलफलोपहारैश्चसमी
हमानेभगवतआराधनंविविक्तउपरतविषयाभिलाषउपभृतोपशमःप
रांनिर्वृतिमवापः॥११॥तयेत्थमविरतपुरुषपरिचर्ययाभगवतिप्रवर्द्ध
मानानुरागभरद्रुतहृदयशैथिल्यःप्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपु
लककुलकऔत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयनएवंनिजर
मणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेनपरिप्लुतपरमाह्लाद
गंभीरहृदयह्रदावगाढधिषणस्तामपिक्रियमाणांभगवत्सपर्यांनसस्मार॥
१२॥इत्थंधृतभगवद्व्रतऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकु
टिलजटाकलापेनचविरोचमानः॥सूर्यर्चाभगवंतंहिरण्मयंपुरुषमुज्जिहा

राम॰
१९

नेसूर्यमंडलेऽभ्युपतिष्ठन्नेतदु होवाच ॥११॥ परोरजःसवितुर्जातवेदोदे
वस्य भर्गो मनसेदं जजान सुरेतसादः पुनराविश्य चष्टे हंसं गृध्राणंनृ
षद्रिंगिरामिमः ॥१२॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवचरित्रे
नामसप्तमोध्याय ७॥ अष्टमे भजतो विस्मृत स्वकर्मान्तरायतः ॥ एणस्तनाप्रस
क्तस्य जातमेणत्वमीर्यते ॥१॥ ॥ श्रीशुकोवाच ॥ एकदा तु महानद्यां कृताभि
षेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकांत उपविवि
श तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्यासमेकैवोपजगाम त
या पिपीयमाने उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभ
यंकर उदपतत् ॥१॥ तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा

भा० पं०
९९

मुत्तरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्स
हसैवोच्चक्राम॥२॥ तस्या उत्पतंत्या अंतर्वत्न्या उरुभयावगलितो योनिनि
र्गतो गर्भः स्रोतसि निपपात तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियु
ज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपाताथ च ममार॥३॥ तं त्वेणकु
णकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया
राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत्॥४॥ तस्य ह वा एणकु
णक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्री
णनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपये
नाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन्॥५॥ अहो बतायं हरिणकुणकः
कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः

राम०
९९

शरणं चमोपसादितो मामेव मातापितरौ भ्रातृन् ज्ञातीन्पोष्यिकांश्चैवोपे
यापनान्यं कं चिन वेदमथ्यति विश्रब्ध ध्यान एवमया मत्सराय णस्यपोष
णपालनप्रीणनलालनमनसूयुनाऽनुष्ठेयं शरणोपेक्षादोषविदुषा ॥
६॥ नूनं ह्यार्यासाधव उपशममनशीलरूपणसुहृद एवंविधार्थेनपि गुरू
नरानुपेक्षन्ते ॥७॥ इति कृत्वानुषंग आशानशायनार्टनस्नानाशनादिषु स
हमजहनास्नेहानुवद्धहृदय आसीत ॥८॥ कुसुमकुसमित्पलाशफलमू
लोदकान्याहरिष्यमाणो वृकशालावृकादिभ्यो भयमाशंसमानः सह हरि
कुणकेन वनं समाविशति ॥९॥ पथिषु च मुग्धभावेन तत्रविषक्तमतिप्र
णयभरहृदयः कार्प्यण्यात्स्कंधेनोद्वहति ॥१०॥ एवमुत्संग उरसि चाधायोपला
यन्मुदं परममवाप क्रियायां निर्वर्त्तमानायामंतरालेप्युत्थायोत्थाय यदैनमभि

श्रीभा० पं०
२०

यतीतनर्हि वा वसवर्षपति प्रकृतिस्थेन मनसा तस्मा आसिष आसास्ते स्या
दत्तास्ते सर्वतत इति अन्यदा भृशमुद्विग्नमाना नष्टद्रविण इव कृपणसकरु
णइव कृपणसकरुणमजितवेणहरिणकविरहविह्वलहृदयसंतापस्त
मेवानुशोचित्विलकश्मलमहदभिरंभित इति होवाच ॥१२॥ अपिवत सवै
कृपणएणवाको मृतहरिणीसुत अहो ममानार्यस्य शठकिरातमतेरकृ
तसुकृतस्य विश्रंभ आ आत्मप्रत्ययेन तदविगणय्य सुजन इवागमिष्यति ॥
१३॥ अपिस्विन्मे एणास्मिन्नाश्रमोपवने शष्पाणि चरंतं देवं गुप्तं द्रक्ष्यामि ॥१४॥
अपि न वृकः शालावृको न्यतमो वा नैकचर एकचरो वा भक्षयति ॥१५॥ नि
म्लोचति हे भगवन् सकलजगमोदयसव्यात्म्या उद्यापि न मम मृगवधून्या

राम०
२०

सन्त्रागच्छति॥१६॥अपिस्विदन्हतसुकृतमागत्यमामुखयिष्यति हरिणराज
कुमारोविविधरुचिरदर्शनीयनिजमृगदारकःविनोदैरसंतोषंस्वानामु
परन्॥१७॥स्वेलिकायांमामम्षासमापिनाश्रामीलितदर्शांप्रेमसंरंभेण
चकितश्रागत्पृषदपरुषविषाणाग्रेणलुठति॥१८॥आसादितहविष
वर्हिषदूषितमयोपालब्धोभीतमील सपद्युपरतास्न्षिकुमारवदवहि
तकरणकलापश्रास्ते॥१९॥किंवाअरेआचरितंतपस्तस्विन्याऽनयाय
द्ियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुर
पदपंक्तिभिर्द्रविणविधुरातुरस्यकृपणस्यममद्रविणपवींसूचयत्यात्मानं
सर्वतःकौतुकंद्विजानांस्वर्गापवर्गकामानांदेवयजनंकरोति॥२०॥अपि
स्विदसोभगउडुपतिरेनंमृगपतिभयान्मृतमातरंमृगबालकंस्वाश्रमपरि

भा॰ पं॰
२१

भ्रष्टं अनुकंपया कृपणजनवत्सल परिपाति ॥२१॥ किंचात्मजविश्लेषज्वरदवद
हनशिखाभिरूपतप्यमानहृदयस्थलनलिनीकंमामुपसृतमृगीतनयः शिशि
रशीतानुरागगुणितनिजवदनसलिलामृतमयाभगस्तिभिः स्वधयनीति ॥२२॥
एवंघटमानमनोरथाकुलहृदयोमृगदारकाभासेनस्वारब्धकर्मणा योगा
रंभणतोभ्रंशितः सयोगतापसोभगवदाराधनलक्षणंचकथमितरथाजात्यं
तरएणकुणकआसंगसाक्षान्निश्रेयसप्रतिपक्षतयाप्राक्परित्यक्तदुस्त्यज
हृदयाभिजातस्यैवमंतरायविहितयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगा
र्भकपोषणपालनप्रीणनलालनानुषंगेणविगणयत आत्मानमहिरिवाखु
बिलंदुरतिक्रमःकालःकरालरभसआपद्यत ॥२३॥ तदानीमपिपार्श्ववर्तिनमात्म
जमिवानुशोचंतमभिवीक्षमाणोमृगएवाभिनिवेशितमनाविसृज्यलोकमिमं

हरे॰
२१

सहमृगेण कलेवरं ममृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥२८॥ तत्रा
विहिता आत्मनो मृगलब्धिरणं भगवदाराधनंसमीहानुभावेनानुस्मृत्य भृ
शमनुतप्यमान आह ॥२९॥ अहो कष्टं भ्रष्टोहमात्मवतामनुपथाद्यद्विमुक्त
समस्तसंगस्य विविक्तपुण्यारण्यस्यात्मवत आत्मनि सर्वेषामात्मनां भगव
ति वासुदेवे तदनुश्रवणमननसंकीर्त्तनाराधनानुस्मरणाभियोगेनाशून्य
सकलयामेन कालेन समावेशितं समाहितं कात्स्न्येन मनस्तत्तु पुनर्ममाबुध
स्यारान्मृगसुतमनुपरिसुस्राव ॥३०॥ इत्येवं निगूढनिर्वेदो विसृज्य मृगीमा
तरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहा
श्रमं कालंजरात्प्रत्याजगाम ॥३१॥ तस्मिन्नपि कालं प्रतीक्षमाणः संगाच्च भृशमु

श्रीभा०पु०
२२

द्दियश्चात्मसहचरः ॥ शुष्कपर्णैर्वीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन् मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ ३८ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतचरित्रेऽष्टमोऽध्यायः ॥ ८ ॥ नवमे जडविप्रत्वेऽतस्यारागाद्यभावतः ॥ भद्रकालीपशुत्वेपि निर्विकारत्वमीर्यते ॥ ९ ॥ ॥ श्रीशुक उवाच ॥ अथ कस्यचिद्द्विजवरस्यांगिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नवसोदर्या अंगजा बभूवुः मिथुनं च यवीयस्यां भार्यायां ॥ १ ॥ यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥ तत्रापि स्वजनसंगाच्च भृशमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंदयुगलमनसा विरधदात्मनः प्रतिघातमशंकमानो भगवदनुग्रहेणानु

हरे०
२२

स्वस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधवधिरस्वरूपेण दर्शयामासलोक
स्य॥३॥तस्यापिहवात्मजस्यविप्रः पुत्रस्नेहानुवद्धमना आसमावर्तनात्संस्का
रान्यथोपदेशंविदधानउपनीतस्यचपुनःशौचाचमनादीन्कर्मनियमान
नभिप्रेतानपिसमशिक्षयत् अनुशिष्टेनभाव्यंपितुःपुत्रेणेति॥४॥सचापि
तदुपितृसंनिधावेवासध्रीचीनमिवस्मकरोति॥छंदांस्यध्यापयिष्यन्स
हव्याहृतिभिःप्रणवशिरस्त्रिपदींसावित्रींग्रैष्मवासंतिकान्मासानधीयानमप्य
समवेतरूपंग्राहयामास॥५॥एवंस्वतनुजआत्मन्यनुरागविवेशितचि
त■शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यभि
युक्तान्यपिसमनुदिष्टेनभाव्यमित्यसदाग्रहपुत्रमनुशास्यस्वयंतावदनधिग
तमनोरथकालेनाप्रमत्तेनस्वयंगृहप्रमतःउपसंहृतःमृतः॥६॥अथयवीयसीद्वि

श्रीभा॰पं॰
२३

जसती स्वगर्भजातं मिथुनं सपत्न्यामुपन्यस्य स्वयमनुसंस्थया पतिलोकमगात्॥ पि
तर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न प
रविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बंधान्न्यवृत्सत॥४॥ स च प्रा
कृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाषमाणो यदा तदनुरूपा॰
णि प्रभाषते कर्माणि स च कार्यमाणः॥ परेच्छया करोति विष्टितो वेतनतो वा
यांचया यदृच्छया चोपसादितमप्रमत्तं वहुमिष्टं कदन्नमभ्यहरति परं नें
द्रियप्रीतीनिमित्तं॥५॥ नित्यनिवृत्तनिमित्तसिद्धिविशुद्धानुभवानंदस्वा
त्मलाभाधिगमः॥ सुखदुःखयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः॥
॥६॥ शीतोष्णवात [illegible] वर्षेषु वृषतांगः पीनः संहननांगः स्थंडिलसंवेशना

हरि॰
२३

नुन्मई नामः जनरजसा महामतिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटि
रूपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञयातज्जनावमतो वि
चचार॥१०॥यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि के
दारकर्मणि निरूपितस्तदपि करोति किंतु न समं विषमं न्यूनमधिकमिति वे
द कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहर
ति॥११॥अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पशुमालभतापत्यकाम॥
१२॥तस्य हैव मुक्तस्य पशोः पदवीं तदनुचराः परिधावंतो निशीथसमये त
मसावृतायामनधिगतपशव आकस्मिकेन विधिना केदारान्वीरासनेन म
गवराहादिभ्यः संरक्षमाणमंगिरसः प्रवरसुतमपश्यन्॥१३॥अथ त ए
नमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रसनया चंडि

कागृहउपनिन्युर्मुदाविकासितवदनाः॥१४॥अथपशुंकल्पयित्वाविधिनाभिषि
च्याहतवाससाछाद्यभूषणालेपस्रक्तिलकादिभिरुपस्कृतंभुक्तवंतं
धूपदीपमाल्यलाजकिसलयांकुरफलोपहारोपेतया॥वैशससंस्थ
यामहतागीतस्तुतिमृदंगपणवघोषेणपुरुषपशुंभद्रकाल्याःपुरतउ
पवेशयामासुः॥१५॥अथवृषलराजपणिःपुरुषपशोरसृगासवेनदेवीं
भद्रकालींयक्ष्यमाणस्तदभिमंत्रितमसिमतिकरालनिशितमुपाददे॥१६॥
इतितेषांवृषलानांरजस्तमःप्रकृतीनांधनमदरजउत्सिक्तमनसांभगवत्कलां
वीरकुलंकदर्थीकृत्योत्पथेनस्वैरंविहरतांहिंसविहाराणांकर्मातिदारुणं
यद्ब्रह्मभूतस्यसाक्षाद्ब्रह्मर्षिसुतस्यनिर्वैरस्यसर्वभूतसुहृदःसूनायाम
प्यमनुमतमालंभनंतदुपलभ्यब्रह्मतेजसाऽतिदुर्विषहेणदंदह्यमा

नेनवपुषासहसोच्चचाष्टसेवदेवीभद्रकाली॥१७॥भृशाममर्षरोषावेशरभस
विलसितभृकुटीविटपकुटीलदंष्ट्रारुणेक्षणाटोपातिभयानकवदनाहंतु
कामैवंमहाट्टहासमतिसंरंभेणविमुंचंतीततउत्पत्यपापीयसांदुष्टानां
तेनैवासिनाविवृक्णशीर्ष्णांगलत्स्रवंतमसृगासवमत्युष्णंसहगणेननिपी
यातिपानमदविह्वलोच्चैस्तरांसपार्षदैःसहगणेननर्त्तचजहारचशिरकुंदुक
लीलया॥१९॥एवमेवखलुमहदभिचारातिक्रमकार्त्स्न्येनात्मनेफलति॥२०॥नं
नवाएतद्विष्णुदत्तमहदद्भुतंयदसंभ्रमःस्वशिरश्छेदनआपतितेपिविमुक्तदे
हाद्यात्मभावसुदृढहृदयग्रंथीनांसर्वसत्वसुहृदात्मनांनिर्वैराणांसाक्षाद्भग
वताऽनिमिषारिवरायुधेनाप्रमत्तेनतैस्तैर्भावैःपरिरक्ष्यमाणानांतत्पाद
मूलमकुतश्चिद्भयमुपसृतानांभागवतपरमहंसानां॥इतिश्रीभागवतेमहा

श्री भा० पं०
२५

पुराणे पंचमस्कंधे भरतचरित्रे नाम नवमो ध्यायः ॥९॥ दशमे शिविकावाहकाः शिविकां शिबिकां स्वां
वहन्मुनिः स्वदुर्वादानुवादेन विनीतायासु प्रसादितः ॥१॥ एवं भूता शिविका रिस्वमतो सर्वयोः
सममितिसर्वंतत्ता सिद्धो रहूगणाकृपेरतं ॥२॥ ॥श्रीशुक उवाच॥ अथ सिंधु
सौवीरपते रहूगणस्य व्रजत इषुमत्यास्तटे तत्कुलपतिना शिविकावाहपुरु
षान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध पीवा युवासंह
ननांगो गोरवद्धुरवोढुमलमिति पूर्वदिष्टगृहीतैः सह गृहीतः प्रसभमतदर्ह
उवाह शिविकां स महानुभावः ॥१॥ यदा हि द्विजवरस्येषुमात्रावलोका
नुगतेन समाहिता पुरुषगतिस्तदा विषमगतां स्वशिविकां रहूगण उप
धार्य पुरुषानधिवहतया आह हे वोढारः साध्वतिक्रमतत्किमिति विष
ममुह्यते यानमिति ॥२॥ अथ ते ईश्वरवचसोपालंभनमुपाकर्ण्योपायतु

हरे०
२५

रीयान्स्त्वं किं तमनास्तं विज्ञापयां बभूवुः॥३॥ नवयं नरदेव प्रमत्ता भवन्निया
मानुपथा साध्वेव ववहामः॥ अयमधुनैव नियन्तोपि न द्रुतं व्रजति तां न
सहवोढुमुह वयं पारयाम इति॥४॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वे
षां सांसर्गिणां भवितुमर्हतीति निश्चित्य निशम्य कृपण एव चोरा जारहू गण
उपासित वृद्धोपि निसर्गेण बलात्कृत ईषदुत्थितमनुरविस्पष्टब्रह्म
तेजसं जातवेदसमिव रजसावृतमति वाह॥५॥ अहो कष्टं भ्रातर्यत्ते
मुपरिष्ठान्तो दीर्घमध्वानमेक एव ऊढवान् सुचिरं नातिपीवानसं
हननं गोरजसा चोपद्रुतो भवान् सखे नो एवापर एते संघटिन इति बहु
विप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशय स्वचरमकलेवरेऽ
वस्तुनि संस्थानविशेषेऽहं ममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभू

भा० पं
२६

न तु स्म शिवीकां विषमपूर्व वदुवाह ॥६॥ अथ पुनः स्व शिविकां वि
षमगतायां प्रकुपितउवाच रहूगणः ॥ किमिदमरे त्वं जीवन्मृतो मां
कदर्थी कृत्य भर्तुः शासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां द
ण्डपाणिरिव जनतायाय था प्रकृतिं स्वां भजिष्यसइति ॥७॥ एवं बहुव
द्धमपिभाषणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृता
शेषभगवत्प्रियनिकेते पंडितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूत
सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव वि
गतस्मय इदमाह ॥८॥ ब्राह्मण उवाच ॥ त्वयोदितं व्यक्तमविप्रलब्धं भ
र्तुः समे स्याद्यदि वीरभारः ॥ गंतुर्यदि स्यादधिगम्यमध्वा पीवेति वा सो न

हरे०
२६

विदांप्रवाद॥१०॥स्थौल्यंकार्श्यंव्याधयोआधयश्चक्षुत्तृड्भयंकलिरि
छाजराच॥निद्रारतिर्मन्युरहंमदःशुचोदेहेनजातस्यहिमेनसंति॥११॥जी
वन्मृतत्वंनियमेनराजन्नाद्यंतवद्यद्विकृतस्यदृष्टं॥स्वस्वाम्यभावो
ध्रुवईड्ययत्रतर्ह्युच्यतेसौविधिकृत्ययोग॥१२॥विशेषवुद्धेर्विवरंमना
क्पश्यामयन्नव्यहारतोऽन्यत्॥कईश्वरस्तत्रकिमीसितव्यंतथापिराजन्
करवामकिंते॥१३॥उन्मत्तमत्तजडवत्स्वसंस्थांगतस्यमेवीरचिकित्सि
तेन॥अर्थःकियान्भवताशिक्षितेनस्तब्धप्रमत्तस्यचपिष्टपेष॥१४॥श्रीशु
कउवाच॥एतावदनुवादपरिभाषयाप्रत्युदीर्य्यमुनिवरउपशमशील
उपरतानात्म्यनिमित्तउपभोगेनकर्मारब्धंव्यपनयतराजयानमपित
थोवाह॥१५॥सचापिपांडवेयसिंधुसौवीरपतिस्तत्वजिज्ञासायांसम्यक्

श्रद्धयाधिगताधिकारस्तत्त्वहृदयग्रंथिविमोचनंद्विजवचः आश्रुत्य
बहुःयोगग्रंथसम्मतंत्वरयावरुह्यशिरसापादमूलमुपसृतःक्षमा
पयन्विगतनृपदेवस्मयउवाच॥१६॥कस्त्वंनिगूढश्चरसिद्विजा
नांबिभर्षिसूत्रंकतमोवधूतः कस्यासिकुत्रत्यइहापिकस्मात्क्षे
मायनश्चेदसिनोतशुक्लः॥१७॥नाहंविशंकेसुरराजवज्रान्नत्र्यक्षशू
लान्नयमस्यदंडात्॥नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंकेभृशंब्रह्म
कुलावमानात्॥१८॥तद्ब्रूह्यसंगोजडवन्निगूढविज्ञानवीर्योविचर
स्यपारः॥वचांसियोगग्रथितानिसाधोननःक्षमंतेमनसापिभेत्तुं॥१९॥
अहंचयोगेश्वरमात्मतत्त्वविदांमुनीनांपरमंगुरुंवै॥प्रष्टुंप्रवृत्तःकिमि
हारणंतत्साक्षाद्धरिंज्ञानकलावतीर्णं॥२०॥सवैभवाल्लोकनिरीक्षणा

र्यमव्यक्तलिंगोविचरत्यपिस्वित् ॥ योगेश्वराणांगतिमंधबुद्धिः कथं
विचक्षीतगृहानुबंधः ॥ २१ ॥ दृष्टः श्रमः कर्मतआत्मनोवैभर्तुर्मतु
र्भवतश्चानुमन्ये ॥ यथासतोदानयनाद्यभावात्समूलइष्टोव्यवहा
रमार्गः ॥ २२ ॥ स्थाल्यग्नितापात्पयसोभितापस्तत्तापतस्तंडुलगर्भ
रंधिः ॥ देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिःपुरुषस्यानुरोधात् ॥
२३ ॥ शास्ताभिगोप्तानृपतिःप्रजानांयःकिंकरोवैनष्टिपिष्टं ॥ स्व
धर्ममाराधनमच्युतस्ययदीहमानोविजहात्यघौघं ॥ २४ ॥ तन्मेभ
वान्नरदेवाभिमानमदेनतुच्छीकृतसत्तमस्य ॥ कृषीष्टमैत्रीदृशमार्त्त
बंधोयथातरेसदवध्यानमंहः ॥ २५ ॥ नविक्रियाविश्वसुहृत्सखस्य

साम्यैव वीताभिमतेस्तवापि॥ महद्विमानात्स्वकृताद्धि मादृक्नंक्ष्यत
दूरादपिशूलपाणेः॥२६॥ इति श्रीभागवते महापुराणे पंचमस्कंधे दश
मोध्याय॥१०॥ एकादशोथ संप्रश्ने रहूगणमहीभृता॥ उपादिशत्परीज्ञा
नं सयोगीति निगद्यते॥१॥ ॥ब्राह्मण उवाच॥ अकोविदः कोविदवादान्
वदस्यथो नातिविदांवरिष्ठः॥ न सूरयो हि व्यवहारमेतं तत्वावमर्षे
ण सहामनंति॥१॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजं
भितेषु॥ न वेदवादेन हि तत्ववादः प्रायेण शुद्धो नु चकास्ति साधुः॥
२॥ न तस्य तत्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्॥ स्वप्ने
निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात्॥३॥ यावन्म
नो रजसा पुरुषस्य सत्वेन वा तमसा वानुरुद्धं॥ चेतोभिराकूतिभि

श्रीभा०पं०
२९

हरे
२९

रा तनोति निरंकुशं कुशलं चेतरं वा ॥४॥ सवासनात्मा विषयोपरक्तो गु
णप्रवाहो विकृतः षोडशात्मा ॥ विभ्रत्पृथग्नामभिरूपभेदमंतर्वहिष्ट्वं
च पुरैस्तनोति ॥५॥ दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमा
व्यनक्ति ॥ आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटं
॥६॥ तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः त
स्मान्मनो लिंगमदो वदंति गुणागुणत्वस्य परावरस्य ॥७॥ गुणानुरक्तं
व्यसनाय जंतोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ॥ यथा प्रदीपो घृतवर्ति
मश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वं ॥८॥ पदं तथा गुणकर्मानु
बद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्वं ॥ एकादशासन्मनसो हि वृत्तयः आ
कूतयः पंच धियोऽभिमानः ॥ मात्राणि कर्माणि पुरं च तासां वदंति हैका

दशवीरभूमीः॥ गंधाकृतीस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पा
॥१०॥ एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः॥ द्रव्यस्व
भावाशयकर्मकालैरेकादशामीमनसोविकारा॥११॥ सहस्रशःशत
शःकोटिशश्च क्षेत्रज्ञतोनमिथोनस्वतस्यु॥१२॥ क्षेत्रज्ञएतामनसोवि
भूतिर्जीवस्यमायारचितस्यनित्याः॥ आविर्हिताक्वापितिरोहिताश्च
शुद्धोविचष्टेह्यविशुद्धकर्तुः॥१३॥ क्षेत्रज्ञआत्मापुरुषःपुराणःसाक्षा
त्स्वयंज्योतिरजःपरेशः॥ नारायणोभगवान्वासुदेवःस्वमाययात्म
न्यवधीयमानः॥१४॥ यथानिलस्थावरजंगमानामात्मस्वरूपेणनि
विष्टईशेत्॥ एवंपरोभगवान्वासुदेवःक्षेत्रज्ञआत्मेदमनुप्रविष्टः॥
१५॥ नयावदेतांतनुभृन्नरेंद्रविधूयमायांवयुनोदयेन॥ विमुक्तसंगो

जितषट्संपन्नोवेदात्मतत्वंभ्रमतीहनावत्॥१६॥नयावदेतन्मनआत्म
लिंगांसंसारतायावपनंजनस्य॥यत्छोकमोहामपरायलोभवैरानु
वंधंममतंविधत्ते॥१७॥भ्रातृव्यमेनंतद्दभ्रवीर्य्यमुपेक्षयाधोधि
तमप्रमत्त॥गुरोहरेश्चरणोपासनास्त्रोजहिव्यलीकंस्वयमात्मपोष॥
१८॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेब्रह्मणरहूगणसंवादे
एकादशोध्यायः११॥द्वादशोपुनराष्ट्रप्टःसंदेहेनमहीभृतासंयोगीस
र्वसंदेहानुपानद्दितीयते॥१॥ ॥रहूगणउवाच॥नमोनमःकारणवि
ग्रहायस्वरूपतुछीकृतविग्रहाय॥नमोवधूतद्विजवंधुलिंगनिगूढ
नित्यानुभवायतुभ्यं॥ज्वरामयार्तस्ययथागदंसत्निदाघतप्तस्यायथाहि
मांभः॥कुदेहमानाहिविष्टदृष्टेर्ब्रह्मन्वचस्तेमृतमौषधंमे॥२॥तस्मा

द्भवं तं मम संशयार्थप्रश्नाय पश्चादधुना सुबोधं ॥ अध्यात्मयोगग्रथि
तं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥३॥ यदाह योगेश्वर दृश्यमा
नं क्रियाफलं सद्व्यवहारमूलं ॥ न ह्यंजसा तत्त्वविमर्शनाय भवानमु
ष्मिन् भ्रमते मनो मे ॥४॥ ब्राह्मण उवाच ॥ अयं जनो नाम चलन् पृथिव्यां यः
पार्थिवः पार्थिव कस्य हेतोः ॥ तस्यापि चांघ्र्योरधि गुल्फजंघाजानू
रुमध्योरशिरोधरांसाः ॥५॥ अंसेऽधि दार्वी शिबिका च यस्यां सौवीरराजे
त्यपदेश आस्ते ॥ यस्मिन् भवान् रूढनिजाभिमानो राजास्मि सिंधुष्विति
दुर्मदांध ॥६॥ शोच्यानिमांस्त्वधिकष्टदीनान् विष्ट्या निगृह्णन्निरनुग्रहो
सि ॥ जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥७॥ यदा क्षि
तावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यं ॥ तन्नामतोऽन्यद्व्यवहारमूलं नि

रूपतांसक्रियया नुमेन॥८॥एवंनिरुक्तंक्षितिशब्दवृत्तमसन्निधानात्परमा
णवोये॥अविद्ययामनसाकल्पितास्तेयेषांसमूहेकृतोविशेषः॥९॥एवं
कृशंस्थूलमणुर्वृहद्यदसच्चसज्जीवमजीवमन्यत्॥द्रव्यस्वभावाशयका
लकर्मनाम्नाजयावेहिकृतंद्वितीयं॥१०॥ज्ञानंविशुद्धंपरमार्थमेकमनंत
रंत्ववहिर्व्रह्मसत्यं॥प्रत्यक्प्रशांतंभगवच्छब्दसंज्ञंयद्वासुदेवंकवयो
वदंति॥११॥रहूगणैतत्तपसानयातिनचेज्ययानिर्वपणाद्गृहाद्वा॥नछं
दसानैवजलाग्निसूर्यैर्विनामहत्पादरजोभिषेकं॥१२॥यत्रोत्तमश्लोकगुण
नुवादप्रस्तूयतेग्रामकथाविघातः॥निषेव्यमाणोनुदिनंमुमुक्षोर्मतिंसतीं
यच्छतिवासुदेवे॥१३॥अहंपुराभरतोनामराजाविमुक्तदृष्टश्रुतसंगवंधः॥
आराधनंभगवतईहमानोमृगोभवंमृगसंगाद्धतार्थः॥१४॥सामांस्मृतिर्मृग

देहोपिवीरक्रस्नार्च्चनप्रभवानोजहाति॥ अतोप्यहंजनसंगादसंगोविशं
कमानोविवृतश्चरामि॥१५॥ तस्मान्नरोसंगसुसंगजातज्ञानासिनेहैव
विवृक्णमोहः॥ हरिंतदीहाकथनश्रुतीभ्यांलब्धास्मृतिर्यात्यतिपा
रमध्वनः॥१६॥ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेब्राह्मणरहूगण
संवादेद्वादशोध्यायः॥१२॥ त्रयोदशेप्रवृद्धोपिविरक्तायथातत्वनिरूप
णंरतिवैराग्यदार्ढ्यायभवाटव्युपवर्ण्यते॥१॥ ॥ब्राह्मणउवाच॥ दुरत्यये
ऽध्वन्यजयानिवेशितोरजस्तमसत्वविभक्तकर्मदृक्॥ सएषसार्थोर्थ
परःपरिभ्रमन्भवाटवींयातिनशर्मविंदति॥१॥ यस्यामिमेषण्नरदेव
दस्यवःसार्थंविलुंपंतिकुनायकंबलात्॥ गोमायवोयत्रहरंतिसार्थिकंप्र
मत्तमाविश्ययथोरणंवृकाः॥२॥ प्रभूतवीरुत्तृणगुल्मगह्वरेकठोरदंशै

मेशकैरूपद्रुत॥ क्वचित्तु गंधर्वपुरं प्रविश्य पतिक्वचित्क्वचिच्चाशुरयोल्मुकग्रहं॥३॥निवासतोयद्रविणात्मबुद्धिस्ततस्ततधावतिभोऽअटव्यां॥ क्वचिच्चवात्योत्थितपांशुधूम्रा दिशो न जानातिरजस्वलाक्षः॥४॥अदृश्य झिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितांतरात्मा॥ अपुण्यवृक्षांश्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित्॥५॥क्वचिद्वितोयाः सरितोभियाति परस्परं चालषते निरंधः॥ आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः॥६॥ शूरैर्हृतः क्वचिन्निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलं॥ क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तं॥७॥ चलन्क्वचित्कंटकशर्कराङ्घ्रिर्नगारुरुक्षुर्विमनास्तु वास्ते॥ पदेपदेभ्यंतरवह्निनार्दितः कौटुंबिकः क्रुध्यति वैजनाय॥८॥ क्वचिन्निगीर्णोऽजगराहि

नाजनोनावैतिकिंचिद्विपिनेपविद्धः॥ दृष्टस्मरोलक्षवदंधरन्ध्रेरंधांध
कूपेपतितस्तमिस्रे॥९॥ कर्हिस्मचित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभि
र्व्यथितोविमानः॥ तत्रातिकृच्छ्रात्प्रतिलब्धमानोबलाद्विलुंपंत्यथतंततो
न्ये॥१०॥ क्वचिच्चशीतातपवातवर्षप्रतिक्रियांकर्तुमनीशआस्ते॥ क्वचि
न्मिथोविपणन्यच्चकिंचिद्विद्वेषमृच्छत्युतवित्तशाठ्यात्॥११॥ क्वचित्क्व
चित्क्षीणधनस्तुतस्मिंशय्यासनस्थानविहारहीनः॥ याचन्परादप्रतिलब्ध
कामःपारक्यदृष्टिर्लभतेवमानं॥१२॥ अन्योन्यवित्तव्यतिषंगवृद्धवैरानु
बंधोविवहन्मिथश्च॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहर
न्विपन्नः॥१३॥ तांस्तान्विपन्नान् सहितत्रतत्रविहारजातंपरिगृ
ह्यसार्थः॥ आवर्ततेद्यापिनकश्चिदत्रवीराध्वनःपारमुपैतियोगं॥१४॥

मनस्विनो र्जितदिगाजेंद्रा ममेति सर्वे भुवि वद्धवैरा ॥ म्बधेरायीर
नुतुन द्वुजंतिय न्मस्त दं डोगनवैरे भियाति ॥१५॥ प्रसज्जति क्वापिल
ताभुजा स्त्रया [illegible] स्तादास्त्रया व्यत्नपदद्विजस्य हः ॥ क्वचित्कदाचिद्व
रिचक्रनस्व सत्सरवं विधतेव कं कग ध्रैः ॥१६॥ द्रुमेषुरंस्यन्नृसुतदा
रवत्सलो व्य वाथदी नो विवरासु वंधने ॥ क्वचित्प्रमादाद्गिरिकंदरेप
नतं वंह्री गहीत्वा गजभीतन्प्रास्थितः ॥१० तेवें चितो हंसकुलं समावि
न्नरोचयच्छीलमुपैति वानरान् ॥ तजातिरारो नसु निर्दतें द्रियपरस्परो
द्वो ह्नणविस्म तावधिः ॥१७॥ द्रुमेषुरंस्यन्नसुतदारवत्सलो व्यवायदी
नो विवरासुवंधने ॥ क्वचित्प्रमादाद्गिरिकंदरेपनतं वल्ली गहीत्वाग

जभीत आस्थितः॥१८॥ अन्तकर्पंचित्सवि मुक्त आपदः पुनश्च सार्य्यं प्रविश्यारिंदमः॥ अध्वन्यमुष्मिन्न जयाति वेशितो भ्रमश्च नो याविनवेदकश्च न॥१९॥ रहूगण त्वमपि ह्यध्वनोस्य संन्यस्तदंडः कृतभूतमैत्रः॥ असज्जितात्मा हरिसेवया सितं ज्ञानासिमादाय तरातिपारे॥२०॥ राजोवाच॥ अहो न्रजन्माखिल जन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन्॥ न यद्धृषीकेशयशः कृतात्मनां महात्मनां च प्रचुरः समागमः॥२१॥ न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला॥ मौहूर्त्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोपहतो विवेकः॥२२॥ नमो महद्भ्यो स्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्य॥ ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु राज्ञां॥२३॥ श्रीशुक उवाच॥ इत्येव

मृतगमानः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मसतत्त्वं विगणयतः परानु
भावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवंदितच
रणः ॥ आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥
२४॥ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्या
ध्यारोपितां देहात्ममतिं विससर्ज एवं हि नृप भगवदाश्रिताश्रितानु
भावः ॥२५॥ राजोवाच ॥ यो ह वा इह बहुविदा महाभागवत त्वयाभिहि
तः परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषिकल्पितवि
षयो नांजसाऽव्युत्पन्नलोकसमधिगमः ॥ अथ तदेवैतद्दुरधिगमं स
वेतानुकल्पितेन निर्दिश्यतामिति ॥२६॥ इति श्रीभागवते महापुराणे पं

भा॰पं॰ ३४

चमस्कंधेत्रयोदशोऽध्यायः॥१३॥ चतुर्दशेभवारण्यरूपकव्याकृतीःकृताः
प्रस्तुतेतस्यगोमायुनराकाद्युपकल्पनैः यःपरिच्छिन्नाऽष्टः॥१॥ ॥श्रीशु
कउवाच॥ यएषदेहात्ममानिनांसत्वादिगुणविशेषविकल्पितकुशल
समवहारविनिर्मितविविधंदेहावलिभिर्योगसंयोगाद्यनासंसारानुभ
वस्यद्वारभूतेनषडिंद्रियवर्गेणतस्मिन्दुर्गाध्ववदसुगमेध्वन्यापति
तईश्वरस्यभगवतोविष्णोर्वशवर्तिन्यामाययाजीवलोकंयथावणि
कसार्थोपरस्वदेहनिष्पादितकर्मानुभवःश्मशानवदशिवतमायांस
ससारटव्यांगतोनाद्यपिविफलबहुप्रतियोगैर्हस्तत्तापोपशमनींहरि
गुरुचरणारविंदमधुकरानुपदवीमवरुंधे॥ यस्यामुहवाएतेषडिं
द्रियमनःकर्मणादस्यवएवते॥१॥ तद्यथापुरुषस्यधनंयत्किंचित्साह्या

राम॰ ३४

द्मर्मोपयिकं वहु ल क्षाधिगतं साक्षात्पुरुषाराधनलक्षणो योसौ
धर्मस्तंतुसांपरायउदाहरंति ॥२॥ तद्वाम्यधनरक्षानस्पर्शन
श्रवणास्वादनो वघ्राणसंकल्पमवसायग्रहग्राम्योपभोगेन
कुनाथस्याजितात्मनोयथासार्थस्यतथा विलुंपति ॥३॥ अथ
चयत्रकौटंविकादारापत्यादयोनाम्नाकर्मणा वृकशृगा
लाएवअनिच्छतोपिकदर्यस्यकुटुंविकादारापत्यादयोनाम्ना
कर्मणा वृकशृगालाएवअनिच्छतोपिकदर्यस्यकुटुंविनःउर
णवत्संरक्ष्यमाणमिषतोपिहरंति ॥४॥ अथाह्यनुवत्सरकृ

ष्यमाणमप्यदग्धवीजंक्षेत्रंपुनरेवावपनकालेगुल्मतृणविरुद्भिर्ग
ह्वरमिवभवति॥५॥एवमेवगृहाश्रमकर्मक्षेत्रंयस्मिन्नहिकर्माण्युत्सीदंति
यदयंकामकरंडएषआवसथः॥६॥तत्रगतोदंशमसकसमापदैर्मनुजैःश
लभसकुंततस्करमूषकादिकादिभि॥रुपध्यमानावहिःप्राणःक्वचि
त्परिवर्तमानोनध्वमविद्याकामकर्मभिरुपरक्तमनसानुपपन्नार्थंन
रलोकंगंधर्वनगरमुपपन्नमितिमिथ्यादृष्टिरनुपश्यति॥७॥क्वचिदा
नयोदकनिभान्विषयानुपधावतिपानभोजनव्यवायादिव्यसनलो
लुपः॥क्वचिच्चाशेषदोषनिषदनंपुरीषविशेषंतद्वर्णनिमितिसुवर्ण
मुपादित्सत्यग्निकामकातरइवोल्मुकपिशाच॥८॥अथकदाचिन्नि

शरायपनीय इव विणाद्याः नेकात्मोपजीवनाभिनिवेशाएं नस्मां संसाराटव्यां
इतपरिधावति ॥ ९ ॥ क्वचिच्च वात्मोपम्यया प्रमदयारोपितस्तत्काल
रजनीभूताः श्वो साधु मर्यादा रजस्वलात्मो दिगदेवता ऽशक्तिरजस्व
लमतिर्नैव जानाति ॥ १० ॥ क्वचित्सकृदवगत विषयेशितस्मृतिस्तथैव
मरीचिस्तोयप्रायांस्तानेवाभिधावति ॥ ११ ॥ क्वचिदुल्लूकडिल्लीस्व
नवदतिपुरुषरभसायोपप्रत्यक्षंपरोक्षं वारिपुराजकुलनिर्भर्त्सि
तेनातिव्यथितकर्णमूलहृदय ॥ १२ ॥ सदरादुग्धपूर्वसुकृतास्तदाका
रस्कारकाकर्तुं ताऽग्रपुण्यमलता विषोदयानवद्रुमयायस्तन्यद्राविणा
न्जीवन्मृतान्स्वयंजीवनम्रियमाणमुपधावति ॥ १३ ॥ एकदाऽसत्प्र
संगान्निहृतमतिपुरस्थोतन्वखलनवद्रुमयोतिपिदुःखदं पांऽखंड

ममियाति ॥ १४ ॥ यदा तु पारबाधयांध आत्मने नोपनमति तदा हि पि
तृपुत्रबर्हिष्मतः पितृपुत्रान् वा स खलु भक्षयति ॥ १५ ॥ क्वचिदासाद्य
गृहं दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं नि
र्वेदमुपगच्छति ॥ १६ ॥ क्वचित्कालविषमितराजकुलरक्षसापहृत
प्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ॥ १७ ॥ कदा
चिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतिलक्षण
मनुभवति ॥ १८ ॥ क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरु
क्षमाणो लोकव्यसनकर्षितमनाः कंटकशर्कराक्षेत्रं प्रविशन्निव सी
दति ॥ १९ ॥ क्वचिच्च दुःसहेन कायाभ्यंतरवह्निना गृहीतसारः स्वकुटुंबा

यत्क्रुध्यन्ति ॥२०॥ स एव पुनर्निद्राजगरगृहीतोंऽधे तमसि मग्नः शून्यार
ण्य इव शेते नान्यत्किंचन वेद शाव इवापविद्धः ॥२१॥ कदाचिद्भग्नमा
नदंष्ट्रो दुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीय
माणविज्ञानोंऽधकूपेऽन्धवत्पतति ॥२२॥ कर्हि स्म चित्काममधुल
वान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुंधानो राज्ञा स्वामि
भिर्वा निहतः पतत्यपारे निरये ॥२३॥ अथ च तस्मादपि भयथापि हि कर्मा
स्मिन्नात्मनः संसारावपनमुदाहरंति ॥२४॥ मुक्तस्ततो यदि बंधाद्दे
वदत्त उपाच्छिनत्ति तस्मादपि भयथापि हि । विष्णुमित्र इत्यनवस्थिति ॥
२५॥ क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रति

निवारणः अवसोदुरंतचिंतयास्ते ॥२६॥ क्वचिन्निमिषोम्रवहन्यत्किंचि
द्धनमन्येभ्यो वा काकिकणिकामात्रमपहरन् यत्किंचिद्वा विद्वेषमे
ति वित्तशाठ्यात् ॥२७॥ अध्वन्यमुष्मिन्निमे उपसर्गास्तथा सुखदुःख
रागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्यावम
मानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः क्वापि देव
मायया स्त्रियाभुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारग
हारंभाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोक
विचेष्टितापहृतहृदय आत्मानमपरेऽंधेतमसि प्रहिणोति ॥२८॥ कदाचि
दीश्वरस भगवतो विष्णोश्चक्रात्परमाण्वादि द्विपरार्द्धापवर्गपलक्ष

णात्परिवर्त्तेनेनवयसारंहसाहरत आब्रह्मस्तृणस्तंबादीनांभूतानाना
मनिमिषतोविभ्रस्तहृदयस्तमेवेश्वरंकालचक्रंनिजायुधंसाक्षाद्भगवं
तंयज्ञपुरुषमनोदृत्यपाखंडदेवताः कंकगृध्रबकवटप्रायाः आर्यसमयपरि
हृतासांकेत्येनाभिधत्ते ॥३०॥ यदापाखंडिभिरात्मवंचितैस्तैरुरुवं
चितोब्रह्मकुलसमावसंस्तेषांशीलमुपनयनादिश्रौतस्मार्त्तकर्मानुष्ठा
नेनभगवतोयज्ञपुरुषस्य आराधनमेवतदरोचयंछूद्रकुलंभजतेऽनि
गमाचारोऽशुद्धितोयस्यमिथुनीभावःकुटुंबभरणंयथावानरजातेः ॥३१॥
तत्रापिनिरवरोधःस्वैरेणविहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्ष

णादिनाग्राम्यकर्मणादिनाव्राह्मणेन कर्मणैव विस्मृतकालावधिः ॥३२॥ क्व
चिद्द्रुमवदैहिकार्थेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायलक्षणः ॥३
३॥ एवमध्वन्यवरुंधानो मृत्युगजभयात्तमसि गिरिकंदरप्राये ॥३४॥ क्व
चित्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवार
णेऽकल्पदुरंतविषयेणास्ते ॥३५॥ क्वचिन्मिथो व्यवहरन् यत्किंचिद्धनमुप
याति वित्तशाठ्येन ॥३६॥ क्वचित् क्षीणधनः शय्यासनाद्युपभोगविहीनो या
वदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततोऽवमानादीनि जनाद
भिलभते ॥३७॥ एवं वित्तव्यतिषंगविवृद्धवैरानुबंधोपि पूर्ववासनयामि
थ उद्वहत्यथापवहति ॥३८॥ एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गावधि

तः आपन्नविपन्नो यस्तमुहवावेतरस्तत्रविसृज्य जातंजातमुपादाय शोचन्मु
ह्यन् बिभ्यन् विदन् क्रंदन् संहृष्यन् गायन्नह्यमानः साधुवर्जितानैवार्त्तवार्त्तते
ऽद्यापियत आरब्ध एषनरलोकसार्थोयमध्वनपारमुपदिशंति ॥३९॥
यदिदंयोगानुशासनंभवता एतदवरुंधतेयन्न्यस्तदंडामुनय॥उपशमशी
लाउपरतात्मानःसमवगच्छंति ॥४०॥ यदपिदिगिभजयिनोयज्विनोयेवैरा
जर्षयः किंतु परंमृधेशयीरन् अस्यामेवममेयमिति कृतवैरानुबंधायांवि
सृज्यस्वयमुपसंहृताकर्मवच्छीमवलंब्यतंतं आपरः कार्यविन्नरकाद्वि
मुक्तः पुनरप्येवंसंसाराध्वनिवर्त्तमानोनरलोकसार्थमुपयंति एवमु
परिगतोपि ॥४१॥ तदिदमुपगायंति आर्षभस्येहराजर्षेर्मनसापिमहा

त्मनः नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः यो दुस्त्यजान्दारसुतान्स्वज
नार्थदारान्प्रार्थ्यां श्रियं सुरवरैः सदयावलोकां नैछन्नृपस्तदुचितं
महतां मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः ॥४३॥ यज्ञाय धर्म
पतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय ॥ नारायणा
य हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार ॥४४॥ इदं भाग
वतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययन
मायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनंदति
च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥४५॥ इति श्री
मद्भागवते महापुराणे परमहंससंहितायां पंचमस्कधे र पा ने ब्रह्मण
रहूगणसंवादे चतुर्दशोध्यायः ॥१४॥ एवमष्टभिरध्यायैर्भरतस्योक्तमीहितं ॥

ततपंचदशोयस्यकीर्त्यतेवंशआजानृपा॥१॥ ऋषभपदवीजीवन्मुक्तमार्गम्
मनुवर्त्तमानंयदस्मेतिशेषः॥ यद्वायंसुमतिंअवेदसमाम्नातांदेवतांकल्प
यिष्यंति बुद्धोयंसाक्षाद्भवतीर्णोइतिमस्यंतरन्यर्थः॥१॥ ॥श्रीशुकउ०॥
भरतस्यात्मजसुमतिनामाभियमुहवाव केचित्पाखंडिन ऋषभपदवी
मनुवर्तमानंचानार्याअवेदसमाम्नातांदेवतांस्वमनीषयापापीयस्या
कलौकल्पयिष्यंति॥१॥ तस्माद्वृद्धसेनायांदेवताजिन्नामपुत्रोभवत्॥२॥
अथासूर्यांततनयोदेवद्युम्नततोधेनुमत्यांसुतःपरमेष्ठी॥ तस्यसुव
र्चलायांप्रतिहर्त्तादय॥ आसन्निज्यकोविदाःसूनवःप्रतिहर्त्तुःस्तुत्या
मजभूमानोअजनिषातां॥४॥भूम्नऋषिकुल्यायामुद्गीथस्ततःप्रस्ता
वोनियुत्सायांहृदयजआसीद्विभुविभोरत्यांचपृथुषेणतस्मान्नक्त

भा०पं०
४०

श्रीकृत्स्नांजज्ञे नक्तात् द्युतिपुत्रोगयोराजर्षिप्रवरउदारश्रवा अजाय
तसाक्षाद्भगवतोविष्णोर्जगद्रिरक्षिषयागृहीतसत्वस्य कलात्मवत्वा
दिलक्षणेन महापुरुषतांप्राप्तं ॥५॥ सवैस्वधर्मेणप्रजापालनपोष
णप्रीणनोपलालनानुशासनलक्षणेनेज्यादिनाचभगवतिमहापु
रुषेपरावरेब्रह्मणिसर्वात्मनार्पितपरमार्थलक्षणेनब्रह्मविचरणा
नुसेवयापादितभगवद्भक्तियोगेनचाभीक्ष्णशः परिभावितातिशु
द्धमतिरूपरतानात्म्यआत्मनिस्वयमुपलभ्यमानब्रह्मात्मानुभवोपि
निरभिमानएवावनिमजूगुपत् ॥६॥ तस्येमां गाथांपांडवेयपुरा
विद उपगायंति ॥७॥ गयंनृपः कःप्रतियातिकर्मभिर्यज्वाभिमानीव

लक्ष्म०
४०

हुविद्धर्मगोप्ता ॥ समागतश्रीः सरसस्वतिः सत्तासत्से ब्रवकोन्योभगव
त्कलान्मतेः ॥ ७ ॥ यममिषिंच्यन्परयामुदासतीः सत्याशिषेदद्ध कन्याः स
रिभिः यस्यप्रजानांदुदुहेधराशिषो गुणरावत्सस्तृतामुधापतः ॥ ८ ॥
छंदांस्यकामस्यचयस्यकामान् दुदुहुरषोवलिंन्नपाः ॥ प्रास्तंचितायु
धिधर्मेणाविप्राययदाशिषांषष्टमंसंपरेत्य ॥ ९ ॥ यस्याध्वरे भगवान
ध्वरात्मामघोनिमाद्यदुरुषोसमीपीषे ॥ श्रद्धाविशुद्धाचलभक्ति
योगत्समर्पितेज्याफलमाजहार ॥ १० ॥ यत्प्रीणनाद्द्दर्हिषदेवतिर्य
गमनुष्यवीरुत्तृणामाविरंच्यात् ॥ प्रीणेनसघसहविश्वजीवःप्री
तस्वयंप्रतीमगाद्यस्य ॥ ११ ॥ गयात्गयांत्यांचित्ररथःसुगतिरवरो

श्रीभा०पं०
४१

धनइतित्रयपुत्रावन्हवुः॥चित्ररथाद्दुर्णायांसम्राड्जनिष्टततउत्कला
यांमरीचिः॥मरीचेर्बिंदुमत्यांविंदुमानुदमानुदपद्यतः तस्मात्सरघा
यांमधुनामाभवत्मधोःसुमनसिवीरव्रतः॥ततोभोजायांमन्थुप्रमं
थुयज्ञातेमंथोसत्यायांभौवन॥ततोहर्षेण्यांत्वष्टाजनिष्टःत्वष्टुवी
रोचनायांविरजः विरजस्यशतजित्प्रवरंपुत्रशतंकन्याचविषूच्यां
किलजातं॥१३॥तत्रायंश्लोकःप्रियव्रतवरामिमंविरजश्चरगोद्भवः
अकरोदत्यलंकीर्त्याविष्णुःसुरगणंयथा॥१४॥इतिश्रीमद्भागवतेम
हापु०पंचमस्कंधे य त शा कीर्तनंनामपंचदशोध्यायः॥१५॥ ॥

हृस्कं०
४१

पूर्वोक्तं द्वीपसिंधुवदिमानं लक्षणरूपतः स्पष्टं प्रवक्तुमारब्धः पंचाध्यायत
तःपरं ॥१॥ षोडशेऽधस्तथा वा द्वीपरितः सलिवेष्टितः मेरोस्थितमहीकं
कर्णिकाचोपवर्ण्यते ॥२॥ प्रियव्रतस्य चरिते प्रोक्ता द्वीपादिकल्पना
तद्विशेषविज्ञासुकथांतेपरिपृच्छति ॥३॥ ॥ राजोवाच ॥ उक्तस्त्व
याभूमंडलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां
गणैश्चंद्रमा वा सह दृश्यते ॥१॥ तत्रापि प्रियव्रतरथचरणपरिखा
तैः सप्तभिः सप्तसिंधव उपक्लृप्ताः यतः एतस्याः सप्तद्वीपविशेषविकल्प
स्त्वया भगवन् खलु सूचितः एतदेवाखिलमहं मानतो लक्षणत
श्च सर्वं विजिज्ञासामीति ॥२॥ भगवतो गुणमये स्थूलरूप आवेशितं मन

५३

नोह्यगुणे सूक्ष्मतम आत्मज्योतिषि ब्रह्मणि भगवति वासुदेवाख्ये क्षम
मावेशितुं तदु हे नंतगुरो र्हस्यनुवर्णयितुमिति ॥३॥ श्रीशुक उवा
च ॥ न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वच
सा वाधिगंतुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगो
लविशेषं नामलक्षणतो व्याख्यास्यामः ॥४॥ यो वायं द्वीपः कुवलय
कमलकोशाभ्यंतरकोशो नियुतयोजनविशालः समवर्त्तुलो यथ
था पुष्करपत्रं ॥५॥ यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टा
भिर्मर्यादागिरिभिः सुविभक्तानि भवंति ॥६॥ एषां मध्ये इलावृतं
नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिरा
जो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य ॥७॥